मीमांसा-दर्शन-विमर्श

H
131.11
NEN/M.D

सोमनाथ नेने

an

ibrary

......

/M.D

......

भारतीय दार्शनिक जगत् के आस्तिक वर्ग में विद्यमान मीमांसा दर्शन ने वैदिक वाक्यों में अर्थविश्लेषण के माध्यम से ही दार्शनिक स्वरूप प्राप्त किया है। मीमांसा दर्शन के स्वरूप तथा वैशिष्ट्य के प्रकाशन के उद्देश्य से इस **मीमांसा-दर्शन-विमर्श** ग्रन्थ की रचना की गई है।

प्रकृत ग्रन्थ के उद्देश्य की पूर्ति हेतु सम्पूर्ण ग्रन्थ को चार परिच्छेदों में विभक्त किया गया है। इनमें प्रथम परिच्छेद को **संस्कृत-निबन्धाः** यह शीर्षक प्रदान कर इसमें बीसवीं शती में विद्यमान मीमांसा की स्थिति की विवेचना के साथ कार्यकारणभाव, भाट्ट सम्प्रदाय के प्रस्थानभेद, प्रामाण्यवाद, विपरीतख्याति, भाट्टमत का आत्मानेकान्तवाद, पूर्वमीमांसकों की दृष्टि में मोक्षस्वरूप, जैसे मीमांसा में विशेष रूप से विचेचीय सात आलेखों का संस्कृत भाषा में समायोजन किया गया है। **द्वितीय परिच्छेद** में मीमांसा में वेदार्थ की समन्विति के साथ मीमांसा में श्रेय तथा प्रेय, एकवाक्यता, आदि शास्त्रीय विषयों के साथ इसकी लोकोपयोगिकता को भी प्रकाशित करने का प्रयास किया गया है। ग्रन्थ के **तृतीय परिच्छेद** में ज्ञान, प्रमाणलक्षण तथा उसकी उपादेयता को भी मीमांसा की दृष्टि से रेखाङ्कित करने का प्रयास किया गया है। **चतुर्थ परिच्छेद** में ईश्वर, काल, सम्बन्ध तथा अभाव के वैशिष्ट्य को भी भाट्ट मीमांसा की दृष्टि से प्रकाशित करते हुए ग्रन्थ, पूर्ण किया गया है।

23cm. xi+282, 2008 मूल्य : 650.00

Cat. No. 27212

Library
B. Bijaral
17.11.09

286
18/11/09.

Forwarded Free of Cost with
complements of Rashtriya
Sanskrit Sansthan, New Delhi

H
131·11
NEN|M·D

प्रथम संस्करण : 2008

© प्रकाशक

ISBN : 978-81-7702-177-X

मूल्य : 650.00

Rashtriya Sanskrit Sansthan, (Deemed University)
Acc No 44751
23-12-09

प्रकाशक :
डॉ० राधेश्याम शुक्ल
एम.ए., पी-एच.डी.
प्रतिभा प्रकाशन
(प्राच्यविद्या-प्रकाशक एवं पुस्तक-विक्रेता)
7259/20, अजेन्द्र मार्केट, प्रेमनगर
शक्तिनगर, दिल्ली-110007
दूरभाष : (O) 47084852 (R) 23848485, 09350884227
e-mail : info@pratibhabooks.com
Web : www.pratibhabooks.com

टाईप सेटिंग : एस० के० ग्राफिक्स
दिल्ली-84

मुद्रक : एस० के० प्रिंटर्स, दिल्ली

पितृभ्यां नमः

स्मृतिशेष स्नेहमयी माता

श्रीमती मनोरमा नेने

तथा

सकल शास्त्ररत्नाकर, सर्वतन्त्रस्वतन्त्र, कैलासवासी पिता

पं० गोपालशास्त्री नेने

की

स्मृति में समर्पित

उपोद्घात

भारतीय चिन्तन के प्रायः सभी दार्शनिक, प्रस्थान, शब्दप्रमाण पर मुख्य रूप से अवलम्बित हैं। दार्शनिक जगत् के नास्तिक तथा आस्तिक दोनों वर्गों में प्रायः सभी ने शब्द की प्रामाणिकता को समान रूप से स्वीकार किया है। आस्तिक वर्ग में परिगणित दार्शनिक प्रस्थान, शब्दात्मक वेद को जिस प्रकार अपनी तत्त्वमीमांसा तथा ज्ञानमीमांसा का मूल आधार मानते हैं, उसी प्रकार चार्वाक को छोड़कर शेष बौद्ध तथा जैन, ये दोनों नास्तिक प्रस्थान भी अपने शब्दात्मक त्रिपिटकों तथा आगमों पर ही पूर्ण रूप से अवलम्बित हैं। आस्तिक (वेदमूलक) दार्शनिक जगत् में विद्यमान सांख्य-योग, न्याय-वैशेषिक, पूर्व-मीमांसा तथा उत्तर-मीमांसा या वेदान्त, इन षट् आस्तिक दर्शनों में भी पूर्व-मीमांसा तथा उत्तर-मीमांसा या वेदान्त, ये दोनों दर्शन, शब्दात्मक वेद के अर्थविचार के रूप में ही अभिव्यक्त हुए हैं। इनमें वैदिक वाक्यों की कर्म-परक व्याख्या, पूर्व मीमांसा का प्रतिपाद्य है। समग्र वेदार्थ को ज्ञानात्मक तथा सच्चिदानन्दात्मक ब्रह्म के रूप में प्रतिपादित करना उत्तर-मीमांसा या वेदान्त का लक्ष्य है। वैदिक वाक्यों के विश्लेषण से अर्थ-विचार की समानता, दोनों के लिए प्रयुक्त 'मीमांसा' शब्द के प्रयोग से ही स्पष्ट हो जाती है।

यद्यपि, मीमांसा शब्द का प्रयोग, अर्थ-विचार की दृष्टि से मीमांसा तथा उत्तर-मीमांसा या वेदान्त, इन दोनों में समन्वित हो जाता है तथापि, मीमांसा शब्द, वैदिक वाक्यों के कर्म-परक विश्लषण रूप कर्म-मीमांसा के विचार अर्थ में (रूढ़) प्रसिद्ध हो गया है। तैत्तिरीय शाखा, मैत्रायणी संहिता, काठक संहिता, शांखायन ब्रह्मण, शतपथ ब्रह्मण, आदि अनके ग्रन्थों में **मीमांसन्ते, मीमांसेरन्** आदि शब्दों के प्रयोग से इस शास्त्र के विचाररूपता की प्राचीनता सिद्ध हो जाती है। वेदान्त के ब्रह्मसूत्र के समान इसमें की गई, अधिकरणों की योजना भी इसके विचारशास्त्रीय स्वरूप को अभिव्यक्त कर देती है। यह मीमांसा दर्शन, तत्त्वमीमांसा

या ज्ञानमीमांसा के प्रतिपादन से प्रारम्भ नहीं होता अपितु, वैदिक वाक्यों के अर्थ-अर्थविचार के प्रसङ्ग में इसकी तत्त्वमीमांसा तथा ज्ञानमीमांसा अभिव्यक्त होकर इसे दार्शनिक स्वरूप की प्राप्ति हुई है। अन्य आस्तिक दार्शनिक प्रस्थानों का आरम्भ ही एक विशेष तत्त्वमीमांसा तथा ज्ञानमीमांसा के प्रतिपादन के उद्देश्य से हुआ है। इन्होंने अपने द्वारा प्रतिपादित तत्त्वमीमांसा तथा ज्ञानमीमांसा के मूल में वेद के प्रामाण्य को सर्वोपरि स्वीकार करके अपनी आस्तिकता प्रकाशित की है। अन्य दर्शनों से इस अर्थ में मीमांसा, दर्शन, एक विलक्षण दार्शनिक प्रस्थान है। मीमांसा का दार्शनिक पक्ष, अन्य दर्शनों की भांति तत्त्वमीमांसा को प्राधान्य प्रदान नहीं करता अपितु, शब्दार्थ-निष्पत्ति की सङ्गति में ही मीमांसा के दार्शनिक सिद्धान्त समन्वित हुए हैं। यागादि कर्मात्मक धर्म के अनुष्ठान का प्रतिपादन करना ही मीमांसा का उद्देश्य है-**धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्।** **(जैमिनि सूत्र 1.1.1 का वार्तिक, संख्या 11)** मीमांसा द्वारा बोध्य यह कर्मात्मक धर्मानुष्ठान, वेद के विधिवाक्यों के अर्थविचार द्वारा ही प्राप्त होता है। वेद के अन्य समस्त प्रकार के वाक्य, इन विधिवाक्यों के साथ समन्वित होकर ही इसके प्रतिपादक बनते हैं। इस कर्मात्मक वेदार्थ की सङ्गति के लिए ही मीमांसा में दार्शनिकता की भी अभिव्यक्ति हुई है। वेद में विद्यमान **'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गलोकं याति'** इस वाक्य में यज्ञ करने वाले यजमान के स्वर्गगमन रूप वेदार्थ का प्रतिपादन किया गया है। यदि पुरोदृश्यमान शरीर को यजमान माना जाए तो यह शरीर नश्वर होने से यज्ञरूपी आयुध (साधन) के बल पर इसके स्वर्गगमनरूप वेदार्थ की अनुपपत्ति हो जाती है, जिसकी सङ्गति के लिए शरीरेन्द्रियादि से भिन्न आत्मतत्त्व मानना अनिवार्य हो जाता है। आचार्य कुमारिल भट्ट इस बात को अत्यन्त स्पष्ट शब्दों में प्रतिपादित करते हैं -

आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते।।

(सम्बन्धाक्षेपपरिहार, कारिका, 103.)

आत्मतत्त्व का उपदेश मोक्ष के उद्देश से प्रदान नहीं किया गया है अपितु, आत्मा का अस्तित्व माने बिना कर्मसङ्गति नहीं हो पा रही थी इसी लिए कर्मसङ्गति के उद्देश्य से ही आत्मा का उपदेश दिया गया है। इसी प्रकार, कर्म तृतीय क्षण में नष्ट हो जाने से कर्मफल की सङ्गति बन सके इस लिए कर्म से उत्पन्न होने वाला तथा कर्मफल की प्राप्ति होने तक द्रव्य, कर्म तथा आत्मा में रहने वाला अपूर्व

रूपी पदार्थ भी माना गया है। इन आत्मा तथा अपूर्व को मानने से जो दार्शनिक स्वरूप मीमांसा ने प्राप्त किया है, कर्म ही उसके भी मूल में विद्यमान है। इसी प्रकार मीमांसा दर्शन की ज्ञानमीमांसा में प्रमुख रूप से विवेचनीय प्रमाणलक्षण, ज्ञानतासिद्धान्त तथा स्वतः प्रामाण्यवाद का सिद्धान्त भी कर्मानुष्ठान तथा कर्मानुष्ठान की कर्तव्यता के प्रतिपादक वेद के यथार्थ बाह्यपदार्थ-प्रतिपादकत्व तथा सर्वविधदोषराहित्य के प्रतिपादन में ही अपनी चरितार्थता अभिव्यक्त करते हैं।

मीमांसा-दर्शन के स्वरूप तथा उसके वैशिष्ट्य के उद्देश्य से निर्मित इस **मीमांसा-दर्शन-विमर्श** ग्रन्थ को चार परिच्छेदों में विभक्त किया गया है। इसके प्रथम परिच्छेद में संस्कृत भाषा में निबद्ध विषयों में से-1. विंशशताब्द्यां मीमांसादर्शनम्, 2. भाट्टमीमांसायां कार्यकारणभावविमर्शः, 3. भाट्टसम्प्रदाये प्रस्थानभेदः, 4. भाट्टनये-प्रामाण्यवादः, 5. ख्यातिवादे विपरीतख्यातिः, 6. आत्मवादे भाट्टानामनेकान्तवादः तथा 7. पूर्वमीमांसकाणां मते मोक्षस्वरूपम्, इन सात महत्त्वपूर्ण आलेखों का समायोजन किया गया है।

इस दर्शन के स्वरूप के प्रकाशक **मीमांसा दर्शन की स्वरूपमीमांसा** संज्ञक द्वितीय परिच्छेद में- 8. भाट्टमीमांसा की वेदार्थसमन्विति, 9. मीमांसा में प्रेय तथा श्रेय की अवधारणा, 10. मीमांसा का नैतिक तथा सामाजिक अवदान, 11. मीमांसा दर्शन का लोकोपयोगी स्वरूप, 12. मीमांसा का एकवाक्यता-सिद्धान्त, 13. मीमांसा में समन्वय एवं एकत्व-निष्पादन की प्रवृत्ति, 14. मीमांसा में अपूर्वविधि की अवधारणा, 15. पूर्वमीमांसा में अपूर्वता के त्रिविध आयाम, 16. न्याय, व्याकरण तथा मीमांसा का अर्थसिद्धान्त, 17. भाट्टमीमांसाभिमत वाक्यार्थ एवं शब्दबोध प्रक्रिया, इन दस आलेखों में मीमांसा के स्वरूप में विद्यमान वेदार्थ (कर्म) की प्रतिपादकता के स्वरूप को प्रकाशित करने का प्रयास किया गया है।

मीमांसा-दर्शन-विमर्श ग्रन्थ के तृतीय परिच्छेद में मीमांसा दर्शन की ज्ञानमीमांसा में मीमांसा के प्रतिपाद्य विषय कर्मात्मक धर्म तथा उसके प्रतिपादक वेद की सर्वविध महत्ता के साथ मीमांसा की दृष्टि से प्रमाण की अज्ञातग्राहिता, बाह्य विषय की सत्ता के लिए ज्ञाततासिद्धान्त तथा लौकिक अर्थ की सत्ता के स्पष्टीकरण के लिए- 18. भाट्टमीमांसा में ज्ञान की आवधारणा, 19. भाट्टमीमांसा में प्रमाणलक्षणविमर्श, 20. भाट्टमीमांसा में प्रमाण तथा उसका प्रयोजन, 21. भाट्टमीमांसा में प्रत्यक्ष की अवधारणा तथा 22. मीमांसा में

इन्द्रियों की प्राप्यप्रकाशकारिता, इन पाँच आलेखों का समायोजन किया गया है।

भारतीय दर्शन के अन्य सम्प्रदायों के समान मीमांसा की भी अपनी एक पदार्थ मीमांसा है। मीमांसा दर्शन, कर्मप्रतिपादक दर्शन होने के कारण उसके द्वारा प्रतिपादित पदार्थ किसी न किसी रूप में कर्म से साक्षात् या परम्परा से अवश्य ही सम्बद्ध हैं। मीमांसा द्वारा विवेचनीय पदार्थों में- **23. मीमांसा दर्शन में ईश्वरास्तित्त्व, 24. भाट्टमीमांसा में कालतत्त्व की अवधारणा, 25. मीमांसा दर्शन में सम्बन्ध की अवधारणा तथा 26. भाट्टमीमांसा में अभाव तथा उसका प्रयोजन**, इन चार आलेखों का ग्रन्थ के चतुर्थ परिच्छेद **पदार्थमीमांसा** में समायोजन किया गया है।

मीमांसा-दर्शन-विमर्श संज्ञक यह ग्रन्थ, गुरुजनों से प्रत्यक्ष तथा अप्रत्यक्ष रूप से प्राप्त ज्ञान के विगत 25 वर्षों के अनुसन्धान का ही परिणाम है। गुरुजनों की कृपा के परिणामस्वरूप इस ग्रन्थ के प्रकाशन के अवसर पर मैं अपने प्रातःस्मरणीय गुरुवर्य, राष्ट्रपतिसम्मान से विभूषित काशी हिन्दू विश्वविद्यालय, वाराणसी के मीमांसा तथा धर्मशास्त्र-विभाग के पूर्व अध्यक्ष, महामहोपाध्याय, डॉ० गजानन शास्त्री मुसळगाँवकर (वैद्य) महोदय के साथ सभी गुरुजनों का कृतज्ञतापूर्वक स्मरण करता हूँ। इसी क्रम में जिन से इस ग्रन्थ की निर्मिति के साथ अन्य सभी अकादमिक कार्यों में निरन्तर उत्साहवर्धक वर्धापन तथा सहयोग मिलता रहता है ऐसे अपने परिवार के सभी ज्येष्ठ तथा कनिष्ठ सदस्यों के साथ अपने मित्रों का भी इस ग्रन्थ के प्रकाशन के अवसर पर स्मरण करते हुए मैं अत्यधिक प्रसन्नता का अनुभव कर रहा हूँ। इस ग्रन्थ के प्रूफ का अवलोकन कर इसके प्रकाशन में सहयोग प्रदान करने के लिए मैं उज्जयिनी-स्थित संस्कृत-महाविद्यालय में व्याख्याता पं० सदानन्द त्रिपाठी जी के उत्कर्ष के लिए भी मङ्गलकामना करता हूँ।

यह ग्रन्थ, दिल्ली स्थित **प्रतिभा प्रकाशन** के स्वत्वाधिकारी डॉ० राधेश्याम शुक्ल के विशेष प्रयास से यथा सम्भव, शुद्ध रूप में प्रकाशित हो रहा है। एतदर्थ मैं इस प्रकाशन-संस्थान के प्रकाशक महोदय का अत्यन्त आभारी हूँ। अन्त में यह सारा विश्व ही जिनकी कृपा-कटाक्ष से निर्मित माना जाता है उन परमेश्वर के प्रति **त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये**, इस गुरुपरम्पराप्राप्त नीति के

अनुसार समस्त जागतिक तत्त्वों के प्रथमोपदेष्टा गुणगणनिलय, आशुतोष, भूतभावन, भगवान् महाकालाभिन्न श्री विश्वनाथ जी के चरणकमलों में अपने इस ग्रन्थ को समर्पित करता हूँ।

आचार्य,
संस्कृत-विभाग, कला-सङ्काय,
काशी हिन्दू विश्वविद्यालय,
वाराणसी- 221005

निवेदक
सोमनाथ नेने

विषयानुक्रमणिका

उपोद्घात v

प्रथम परिच्छेद : संस्कृत निबन्धाः 1-72

1. विंशशताब्द्यां मीमांसादर्शनम् 3
2. भाट्टमीमांसायां कार्यकारणभावविमर्शः 21
3. भाट्टसम्प्रदाये प्रस्थानभेदाः 28
4. भाट्टनये प्रामाण्यवादः 37
5. ख्यातिवादे विपरीतख्यातिः 42
6. आत्मवादे भाट्टानामनेकान्तवादः 48
7. पूर्वमीमांसकाणां मते मोक्षस्वरूपम् 62

द्वितीय परिच्छेद : मीमांसा दर्शन की स्वरूपमीमांसा 73-184

8. भाट्टमीमांसा की वेदार्थ-समन्विति 75
9. मीमांसा में प्रेय तथा श्रेय की अवधारणा 83
10. मीमांसा का नैतिक तथा सामाजिक अवदान 94
11. मीमांसा दर्शन का लोकोपयोगी स्वरूप 103
12. मीमांसा का एकवाक्यता-सिद्धान्त 116
13. मीमांसा में समन्वय एवं एकत्वनिष्पादन की प्रवृत्ति 125
14. मीमांसा में अपूर्वविधि की अवधारणा 139
15. पूर्वमीमांसा में अपूर्वता के त्रिविध आयाम 151
16. न्याय, व्याकरण तथा मीमांसा का अर्थसिद्धान्त 162
17. भाट्टमीमांसाभिमत वाक्यार्थ एवं शाब्दबोधप्रक्रिया 173

तृतीय परिच्छेद : मीमांसा-दर्शन की ज्ञानमीमांसा 185-246

18. भाट्टमीमांसा में ज्ञान की अवधारणा 187

1
विंशशताब्द्यां मीमांसादर्शनम्

निखिलविद्यामूलकत्वेन प्रसिद्धस्य वेदस्य "चोदनालक्षणोऽर्थो धर्म" इत्यनेन सूत्रेण सह अन्यैरपि विविधैर्युक्तिभिः धर्मापरपर्यायत्वेन कर्मप्रतिपादकत्वमे वर्ततेऽस्य मीमांसा-शास्त्रस्य प्रवृत्तिनिमित्तम्। अस्य कर्मात्मकस्य धर्मस्याविकलं स्वरूपमुद्घाटयितुं प्रवृत्तस्य वाक्यविश्लेषणात्मकस्य मीमांसा-शास्त्रस्य महर्षि जैमिनिप्रणीतैस्सूत्रैराविर्भावे सञ्जाते भाष्यकारस्य शबरस्वामिनो युक्तिभिः प्रकाशिते च स्वरूपे प्रभाकरकुमारिलमुरारिपरिश्रमगुम्फितायां त्रिवेण्यां प्रभाकरकुमारिलयोः सिद्धान्ता एतयोरनुसरणं कुर्वद्भिर्विद्वद्भिर्विविधाभी रचनाभिः भृशं संवर्द्धिताः। यथा एकोनविंशशताब्दीपर्यन्तं वर्द्धापिता विद्वद्भिरुभयोर्मीमांसकयोः परम्परा तथैव वर्तमानकालसम्बद्धायामतीतायां विंशशताब्द्यामपि विलसद्भिः प्राच्यैर्विद्वद्भिः सह विद्वदपश्चिमैः पश्चिमे भवैर्विद्वद्भिरपि महता प्रयासेन संरक्षिता परिलक्ष्यते जैमिनिप्रवृत्ता एकोनविंशकालपर्यन्तं सम्प्राप्ता धर्मप्रमाप्रतिपादकस्य वाक्यविश्लेषणात्मकस्य मीमांसादर्शनस्येयं गौरवशालिनी परम्परा।

विंशशताब्द्यां धरायामाविर्भूतैर्विद्वद्भिः परम्पराप्राप्तस्य शास्त्रस्य न केवलं टीकाव्याख्याटिप्पण्यादिभिर्व्याख्यापद्धतिभिर्विधमाने स्वरूपे वैशद्यं सम्पादितमपितु अस्मिन्काले विद्यमानैरेभिर्विद्वद्भिः स्वकीयाभिः स्वतन्त्ररचनाभिरपि दर्शनस्यास्य विकासपरम्परायामुल्लेखनीयमवदानं समर्पितं परिलक्ष्यते। अतीतायां शताब्द्यां मीमांसावैभवसम्पादकानां विदुषामेतेषां व्याख्यास्वतन्त्ररचनाभेदभिन्नानां कृतीनाञ्च प्रस्तूयते सङ्क्षिप्तं विवरणम्-

विंशशताब्द्यां प्रकाशिता व्याख्याग्रन्थाः

अतीतायाः विंशशताब्द्याः पूर्वभागे पञ्चदशतमे वर्षे महादेवशर्माबाक्रे-महाभागेन मीमांसाशास्त्रप्रवर्तकानां जैमिनि-सूत्राणां तत्सदुपाख्यवैद्यनाथभट्ट विरचिता न्यायबिन्दुसञ्ज्ञिका व्याख्या सम्पाद्य प्रकाशिता वर्तते। जैमिनिसूत्राणामेव

मण्डनमिश्रप्रणीता मीमांसानुक्रमणिका महामहोपाध्याय-डॉ०गङ्गानाथ झामहाभागैः सह धुण्डिराजशास्त्रिभिः सम्पादिता। इयं वाराणस्यां विद्याविलासमुद्रणालयादष्टाविंशतितमे वर्षे प्रकाशिता।

अस्य जैमिनिप्रणीतस्य मीमांसादर्शनस्य प्रथमपादतः द्वादशाध्यायपर्यन्तायाः सम्पूर्णाया द्वादशलक्षण्याः षट्सु भागेषु निखिलं स्वरूपं विनायकगणेशआपटे-महाभागेन पुण्यपत्तनस्थस्य आनन्दाश्रममुद्रणालये प्रकाशितम्। तत्र प्रथमे भागे आदित द्वितीयाध्यायप्रथमपादीया विषयाः सङ्कलितास्सन्ति। अत्र शाबरभाष्योपेतस्य प्रथमाध्यायस्य तर्कपादस्य प्रभाव्याख्या वैद्यनाथशास्त्रिणा विरचिता। द्वितीयपादात् द्वितीयाध्यायस्य प्रथमपादपर्यन्तायाः शाबरभाष्ये विरचितायाः तन्त्रवार्त्तिकव्याख्यायाः टिप्पण्यादिभिः संशोधनमत्र हक्कीग्रामाभिजनैः सुब्बनाशास्त्रिभिः निष्पादितम्। ऊनत्रिंशत्तमे खिस्तीये वर्षे प्रकाशितोऽयं प्रथमो भागः। अन्येऽपि पञ्चभागा एभिरेव सुब्बनाशास्त्रिभिः संशोधितास्सन्ति। द्वितीयो भागः त्रिंशत्तमे वर्षे, एकत्रिंशत्तमे वर्षे तृतीयो भागः, द्वात्रिंशत्तमे वर्षे चतुर्थः, त्रयस्त्रिंशत्तमे वर्षे पञ्चमः, चतुस्त्रिंशत्तमे वर्षे चरमः षष्ठो भागः प्रकाशितः सञ्जातः। अस्यैवोत्तरवर्तिनि कालेऽष्टात्रिंशत्तमे वर्षे वाराणस्याः सूर्यप्रभातछापाखानासञ्ज्ञकाद् मुद्रणालयाद् मीमांसासूत्राणां नीलकण्ठज्योतिर्विद्भिः रचिता द्वितीयाध्यायस्य चतुर्थपादपर्यन्ता सुबोधिनी व्याख्या लीथोप्रक्रियया प्रकाशिता वर्तते। तदनु इमानि सूत्राणि, प्रथमाध्यायस्य चतुर्थपादपर्यन्तानि श्रीशितीशकण्ठभट्टविरचितया सुबोधिनी सञ्ज्ञिकया सूत्रवृत्त्या सह इन्दौरनगरस्थात् बड़ासराफाकाटन एसोसिएशन-द्वारा द्व्यधिकद्विसहस्रे वैक्रमाब्दे प्रकाशितानि सन्ति। अत्र सम्पादनं ब्रह्मचारिसर्वेश्वरानन्देन कृतम्। संशोधनञ्च उभोइकरेण भारद्वाजतुलाशङ्करशर्मणा निष्पादितम्। अतीतायाः शताब्द्या अष्टचत्वारिंशत्तमे वर्षे सताराजिलान्तर्गते 'वाई'-स्थाने स्थितात् प्रज्ञापाठशालामण्डलात् प्रकाशकेन वी०जी०जोशीमहोदयेन सम्पूर्णः जैमिनिसूत्रपाठः केवलानन्द- सरस्वतीप्रणीतया टिप्पण्या सहितः प्रकाशितः।

जैमिनिप्रणीतेषु सूत्रेण सह यथा संस्कृतगिरा व्याख्याः दृष्टिपथमालोकयन्ति, तादृशी स्थितिर्यद्यपि अन्यासां भाषाणां नास्ति तथापि, हिन्दीमराठीभाषाभ्यां सहाङ्ग्लभाषायामपि विदुषां श्रमफलानि अस्मभ्यमुपलब्धानि सन्ति। मन्ये एतेषामप्युल्लेखे नास्त्यनौचित्यम्।

भारतवर्षस्य राजधान्यामवस्थितादेहातीपुस्तक भण्डारात् जैमिनि-सूत्राणां

प्रथमाध्यायस्य प्रथमपादतः तृतीयाध्यायस्य अष्टमपादपर्यन्तं हिन्दीभाषायामनुवादः प्रकाशितो वर्तते। अस्मिन् पुस्तके यथानुवादकस्य नामोल्लेखो नास्ति तथा कालोप्यत्रानुल्लिखित एव वर्तते। एकचत्वारिंशत्तमे वर्षे 'जैमिन्यर्थदीपिका' सञ्ज्ञिका द्विपञ्चाशतधिकैरेकशतसङ्ख्यापरिमितैः पृष्ठैः प्रथमाध्यायस्य प्रथमापादस्य प्रथमसूत्रतः षष्ठाध्यायस्य तृतीयपादस्याष्टादशसूत्रपर्यन्ता केशवलक्ष्मण-दफ्तरी महाभागैर्विरचिता शाबरभाष्यस्यालोचनात्मिका विशेषरूपेण शूद्राणामपि यागाधिकारप्रतिपादिका व्याख्याऽवलोकने समागता वर्तते। शाण्डिल्यगोत्रेण हारितवंशिणा दिवोदासात्मजेन मोहनदासेन आङ्गलभाषया कृतः पूर्वमीमांसासूत्रार्थः पञ्चविंशतितमे ख्रिस्ते वर्षे प्रयागस्थितात् युनियनमुद्रणालयात् प्रकाशितः सञ्जातः। जैमिनिसूत्रानुरूपं शाबरभाष्यमपि अष्टषष्ठितमे ख्रिस्ते वर्षे महामहोपाध्यायपदवीजुषैर्हरिहरकृपालुद्विवेदमहाभागैः कलकत्तास्थिताद्वानिक-मुद्रणालयात् 'कल्पकलिका' व्याख्यासहितं प्रकाशितम्।

सूत्रभाष्यादपि कौमारिलवार्तिकं प्रति विदुषां भूयसी निष्ठा परिलक्ष्यते। सुचरितमिश्रप्रणीतया काशिकया विलसितं 'मीमांसाश्लोकवार्तिकम्' त्रिभिः सम्पुटैः तिरु-अनन्तपुरस्थस्य राजकीयमुद्रणालयस्याध्यक्षेण प्रकाश्यतामानीतम्। अस्य प्रथमः सम्पुटः षड्विंशतितमे वर्षे, द्वितीयः ऊनत्रिंशत्तमे तथा तृतीयः त्रिचत्वारिंशत्तमे ख्रिस्ते वर्षे प्रकाशितः। प्रथमद्वयोः सम्पुटयोः सम्पादनं संशोधनपुरस्सरं संस्कृतग्रन्थप्रकाशनकार्याध्यक्षैः के शिवशास्त्रिभिः विहितम्। श्रीमन्तो वि०ए०-रामस्वामिशास्त्रिणः तृतीयं सम्पुटमसम्पादयन्। चत्वारिंशत्तमे वर्षे भट्टोम्बेकविरचितया तात्पर्यटीकयोपेतमेतच्छ्लोकवार्तिकम्' मद्रपुर्या विश्वविद्यालयात् प्रकाशितम्। शे०कृ० रामनाथशास्त्रिणः सम्पादनमस्याकारिषुः। न्यायरत्नाकर-व्याख्यासमलङ्कृतमीमांसाश्लोकवार्तिकं वाराणस्यां स्थितेन चौखम्बासंस्कृतसीरीजऑफिसेनापि दृष्टिपथमानीतम्। कालोल्लेखोऽत्र नोपलभ्यते। अस्या विंशशताब्द्या अष्टसप्ततितमे वर्षे वाराणसीस्थितेन तारापब्लिकेशनसंस्थया पार्थसारथिमिश्रविरचितया न्यायरत्नाकरव्याख्यया सहितं सम्पूर्णं 'श्लोकवार्तिकम्' प्रकाशितम्। भारतीयविद्याप्रकाशनेन देहलीस्थितेन सूत्रभाष्यसहितस्य श्लोकवार्तिकस्य न्यायरत्नाकर-व्याख्या सहितं 'मीमांसादर्शनम्' द्वाभ्यां खण्डाभ्यां प्रकाशितम्। ऊनाशीतितमे ख्रिस्ते वर्षे प्रथमः खण्डः प्रकाशितः। अस्य ग्रन्थस्य विषमस्थलीयानामर्थाणां प्रकाशिकया टिप्पण्या सहितं सम्पादनमकुर्वनस्मद्गुरुचरणाः

श्रीमन्तो डॉ० गजाननशास्त्रिमुसलगाँवकरमहाभागाः। राष्ट्रभाषायामस्य श्लोकवार्तिकस्य व्याख्यानं श्रीमद्भिः पण्डितदुर्गाधरझा- महाभागैरकारि। प्रकाशनमस्य ऊनाशीतितमे वर्षे कामेश्वरसिंह दरभङ्गासंस्कृत- विश्वविद्यालयेन दरभङ्गास्थितेन निष्पादितम्। जैमिनिसूत्राणां शाबरभाष्यस्य प्रथमाध्यायस्य द्वितीयपादतः तृतीयाध्यायपर्यन्तं कुमारिलभट्टकृतं 'तन्त्रवार्तिकम्' भट्टसोमेश्वरविरचितया राणकापरनामधेयया न्यायसुधाव्याख्यया सहितं प्रथम एव वर्षे वाराणस्या विद्याविलासमुद्रणालयेन प्रकाश्य दृष्टिपथं समानीतम्। अस्य सम्पादनं पुण्यपत्तनस्य डेक्कनकालेजस्थसंस्कत प्रधानाध्यापकास्तदानीन्तना आडकरोपाह्वाः मुकुन्दशास्त्रिणोऽकारिषुः भट्टपादानामस्य तन्त्रवार्तिकस्य श्रीपरितोषमिश्राविरचिता 'अजिता' सञ्ज्ञिका व्याख्या भागद्वयपरिमिता द्वितीयाध्यायस्य चतुर्थचरणान्ता प्रयागस्थितस्य गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठस्य प्रधानसम्पादकत्वेन श्रीमद्भिर्गयाचरणझामहाभागैः प्रकाश्यमानीता। डॉ० कमलनयनशर्ममहाभागैस्सह अर्चनाचतुर्वेदमहाभागानां सहाय्येन श्रीमन्तः डॉ० किशोरनाथझामहाभागा अस्या सम्पादनं कृतवन्तो विराजन्ते। अष्टाशीतितमे वर्षे प्रथमः भागः द्वितीयश्च नवतितमे ख्रिस्ते वर्षे प्रकाशितः सञ्जातः। मीमांसासूत्रभाष्यस्य चतुर्थाध्यायस्य प्रथमपादतः द्वादशाध्यायपर्यन्ता भट्टपादानां 'टुप्टीका' वाराणस्या विद्याविलासयन्त्रणालयात् चतुर्थे वर्षे प्रकाश्यतामुपगता। सी-आई-ई-इत्युपाधिविभूषिताः सर्वतन्त्रस्वतन्त्रा गङ्गाधरशास्त्रिणः सम्पादनमस्य व्यदधुः। भट्टपादानां टुप्टीकामवलम्ब्य 'तन्त्ररत्न' इति नाम्नी मीमांसाशास्त्रस्य विशदा व्याख्या भाट्टमतावलम्बिषु विद्वत्स्वन्यतमैः पार्थसारथिमिश्रवर्यैर्विरचिता। इयं तन्त्ररत्नात्मिका व्याख्या चतुर्थाध्यायस्य प्रथमपादस्य प्रथमसूत्रतः द्वितीयपादस्य द्वाविंशसूत्रपर्यन्ता गङ्गानाथझामहाभागैः संशोध्य टिप्पणीसहिता प्रथमभागे परिकल्पिता। अस्य प्रथमभागस्य प्रकाशनं त्रिंशत्तमे वर्षे महामहोपाध्यायवर्यैः पं० गोपीनाथकविराजमहाभागैर्निष्पादिप्तम्। अग्रतः पञ्चमाध्यायस्य द्वितीयपादस्य एकोनविंशसूत्रपर्यन्तमस्य द्वितीयभागस्य टिप्पणीसहितं संशोधनं, पितृचरणैः 'नेने' इत्युपाधिकैः पं० गोपालशास्त्रि- चरणैर्निष्पादितम्। अयमपि भागः कविराजमहाभागैः त्रयस्त्रिंशत्तमे वर्षे प्रकाशितः। सम्पूर्णमिदं 'तन्त्ररत्नम्' वाराणसेय-संस्कृत विश्वविद्यालयेन षड्त्रिंशत्तमे वर्षे प्रकाशितम्। श्री ति० वे० रामचन्द्रदीक्षितमहाभागैरस्य सम्पादनं टिप्पणी- संयोजनपुरस्सरं निर्व्यूढम्।

भट्टपादैर्विरचितयोर्द्वयोर्वार्तिकयोराङ्ग्लभाषायामनुऽवादं महामहोपाध्याय-पदवीविभूषिता: डॉ० गङ्गानाथझा-महाभागा अकार्षु:। पूर्वमीमांसा-इन-इट्स सोर्सेस इत्यस्य ग्रन्थस्य परिशिष्टे श्रीमद्भिरुमेशमिश्रमहाभागै: समायोजितायां मीमांसकानां परिचय-प्रकाशिकायां मीमांसाकुसुमाञ्जलौ अयमुल्लेरखो वर्तते।

भट्टपादानामनुयायिषु अन्यतमत्वेन मण्डनमिश्रवर्याणां प्रसिद्धिर्न केवलं विद्वत्स्वपितु सर्वसामान्येष्वपि दृढमूला प्रतीयते। मीमांसाया भाट्टप्रस्थाने विद्यमानानामप्येतेषां विचारस्वातन्त्र्यं प्राय: सर्वेष्वपि एभिर्विरचितेषु ग्रन्थेषूपलभ्यते। मीमांसानुक्रमणिकाभावनाविवेकविधिविवेकविभ्रमविवेकस्फोटसिद्धिब्रह्म-सिद्धिसञ्ज्ञका वर्तन्ते एतेषामुल्लेखनीया ग्रन्था:। एतेषु मीमांसानुक्रमणिकाया जैमिनिसूत्रसन्दर्भे कृत एव वर्तते उल्लेख:। अन्येषु भागद्वयपरिमिता गङ्गानाथझा-महाभागैस्सम्पादिता भावनाविवेकटीका भट्टोम्बेकविरचिता वाराणस्या: तात्कालिकया गवर्नमेण्ट-संस्कृतलाइब्रेरीसंस्थया प्रकाशिता। प्रथमो भागो द्वाविंशतमे वर्षे प्रकाशित:। द्वितीये भागे त्रयस्त्रिंशत्तम: काल उल्लिखितो वर्तते। मण्डनमिश्रविरचितो विभ्रमविवेक: एस० कुप्पुस्वामिशास्त्रिभि: पञ्चदशात्मकै: पृष्ठैरुपन्यस्तेनाङ्ग्लभाषागुम्फितेन प्रास्ताविकेन सह द्वात्रिंशत्तमे वर्षे सम्पादित:। मद्रपुर्यां स्थितेन जर्नल-ऑफ-यूनाईटेड-रीसर्च-संस्थानेनायं प्रकाशित:। मिश्रवर्याणां सर्वेष्वपि ग्रन्थेषु प्राथम्येनोल्लेखनीयो 'विधिविवेक:' श्रीवाचस्पतिमिश्र-प्रणीतन्यायकणिकासहित: डॉ०-महाप्रभुलालगोस्वामिमहाभागै: सम्पाद्य वाराणस्या' ताराबुकएजेन्सी इत्यस्मादष्टसप्ततितमे ख्रिस्ते वर्षे प्रकाशित:। भट्टानुयायिषु मण्डनमिश्राणामनन्तरं सर्वतन्त्रस्वतन्त्राणां वाचस्पतिमिश्राणामेव प्राशस्त्यं विदुषामभिमतं वर्तते। ऐतेषां भाट्टदृष्ट्या शाब्दबोधरूपेण सह प्रक्रिया-प्रकाशकस्तत्त्वबिन्दुसञ्ज्ञको ग्रन्थ: परमेश्वरविरचितया तत्त्वविभावनया सह व०अ०रामास्वामिशास्त्रिभि: सम्पाद्य षड्त्रिंशत्तमे वर्षे सन्तजोसेफ-इण्डस्ट्रीयलस्कूल-मुद्रणालयात् प्रकाशित:। ग्रन्थोऽयं महामहोपाध्याय-गङ्गाधरशास्त्रिभि: विषमस्थलटिप्पणीभि: संवलितो वर्तते।

भट्टमतानुयायिनां पार्थसारथिमिश्रमहाभागानां मीमांसाशास्त्रस्य प्रमुखाणां विषयाणां प्रकाशनाय विरचिता 'न्यायरत्नमाला' महामहोपाध्यायपदवीभूषणै: श्री गङ्गाधरशास्त्रिचरणै: परिशोध्य एकोनविंशतमे ख्रैस्ताब्दे प्रकाशिता। इयमेव न्यायरत्नमाला रामानुजाचार्यविरचितया नायकरत्नाख्यव्याख्यासहिता के०एस०

रामास्वामी शास्त्रिशिरोमणिभिः सप्तत्रिंशत्तमे वर्षे वडोदरास्थितात् प्राच्यविद्याकेन्द्रात् प्रकाशिता। मीमांसा-सूत्राणां व्याख्याया व्याजेन निखिलस्य तन्त्रस्य प्रकाशिका तर्कपादपर्यन्ता श्रीमद्रामकृष्णप्रणीतयुक्तिस्नेहप्रपूरणीसिद्धान्तचन्द्रिकया सहस्वोपज्ञसिद्धान्तचन्द्रिकागूढ़ार्थविवरणविभूषिता 'शास्त्रदीपिका' श्रीधर्मदत्तझा (बच्चा झा) महोदयैः सम्पादिता। अष्टाशीतितमे वर्षे तर्कपादं विहाय तत्सद्विद्यानाथविरचितया प्रभया संवलितायाः पञ्चमाध्यायपर्यन्तायाः श्रीमद्भिः पट्टाभिरामशास्त्रिभिः सम्पादिताया अस्या प्रथमो भागः देहलीस्थितेन श्रीलालबहादुरशास्त्रिकेन्द्रीयविद्यापीठेन प्रकाशितः। इयमेव 'शास्त्रदीपिका' अप्पय्यदीक्षित विरचितया 'मयूखावलि' संवलिता श्रीरङ्गम्स्थितेन वाणीविलासमुद्रणालयेन प्रकाशिता। सम्पादनञ्चास्या पी०पी० सुब्रह्मण्य शास्त्रिभिः कृतम्। कालस्त्वत्र अनुल्लिखित एव। अस्याः शास्त्रदीपिकाया आङ्ग्लानुवादः श्रीमद्भिः डी०वेङ्कटरामैय्यामहाभागैर्वडोदरास्थितात्प्राच्य विद्यासंस्थानाच्चत्वारिंशत्तमे वर्षे प्रकाश्यतामानीतो वर्तते। षष्ठे खैस्ते वर्षे पुण्यपत्तनस्थितादानन्दमुद्रणालयात् माधवाचार्य-विरचिता जैमिनीयन्यायमाला दाधीच इत्युपाधिकैः शिवदत्तशर्मभिः प्रकाश्यतामानीता। देवनाथठक्कुररचिता नारायणशास्त्रिखिस्तेमहाभागैस्सह 'वाकले' इत्युपाधिकैर्विद्यानाथशास्त्रिभिः सम्पाद्य षड्विंशतमे वर्षे वाराणस्या विद्याविलासमुद्रणालयात् प्रकाशिता। मीमांसाशास्त्ररसायनानामप्पय्यदीक्षितवर्याणां 'विधिरसायनम्' अडकरोपनामकैः श्रीमुकुन्दशास्त्रिभिः परिशोधितम्। वाराणस्या विद्याविलासयन्त्रालयात् हरिदासगुप्तैः प्रथमे वर्षे प्रकाशितम्। अस्य समालोचनात्मकं श्रीशङ्करभट्टप्रणीतं 'विधिरसायनदूषणमपि' अष्टनवतितमे वर्षे काश्यां स्थिता-द्रायलमुद्रणालयाद् अलीबक्ख्शद्वारा प्रकाश्यतामानीतम्। सूर्यनारायणशर्मशुक्ल महाभागैरस्य सम्पादनमकारि। द्वादशे ख्रिस्ते वर्षे दीक्षितवर्याणां 'वादनक्षत्रमाला' जे०के० बालसुब्रह्मण्यम् महाभागाः श्रीरङ्गमावस्थिताद्वाणीविलासमुद्राणाल-यात्प्रकाश्यतामानीतवन्तः। एतेषामेव दीक्षितमहाभागानां कनिष्ठभ्रातुः प्रपौत्रैरप्पयदीक्षितद्वितीयैर्विरचिता सप्तमतरङ्गपर्यन्ता पूर्णा दुरूहशिक्षा मीमांसारत्नैः पं० अ० सुब्रह्मण्यशास्त्रिभिः सम्पाद्य ऊनसप्ततितमे वर्षे प्रकाशिता। भाट्टमतावलम्बिनो नारायणभट्टस्य 'मानमेयोदय' आङ्ग्लभाषानुवादेन सह सम्पाद्य सी० कुन्हनराजामहाभागैः मद्रपुर्यामाड्यारस्थाने स्थितात् थियोसोफिकलपब्लिशिङ्ग हाऊस इत्यस्मात्प्रकाशनस्थायानात् त्रयस्त्रिंशत्तमे वर्षे सम्पाद्य प्रकाशितः। स्वामियोगीन्द्रानन्दमहाभागैरस्य मानमेयोदयस्य राष्ट्रभाषायां विशदा व्याख्या निर्मिता

वर्तते। वाराणस्या चौखम्बाविद्याभवनादस्या द्वितीयं संस्करणं षण्णवतितमे वर्षे प्रकाशितम्। भट्टशङ्करविरिचितस्य 'मीमांसाबालप्रकाशस्य' सम्पादनमकार्षुः पण्डितमुकुन्दशास्त्रिणः अडकरोपाधिकाः। ग्रन्थोऽयं द्वितीये वर्षे काश्यां विद्याविलासमुद्रणालयात् प्रकाशितः।

भाट्टमतावलम्बिनः खण्डदेवेन विरिचितः प्रथमाध्यायस्य द्वितीयपादतः तृतीयाध्यायस्य तृतीये पादे सप्तमबलाबलाधिकरणान्तेन सम्पूर्णो मीमांसाकौस्तुभो वाराणस्या विद्याविलासमुद्रणालयेन त्रयस्त्रिंशत्तमे वर्षे प्रकाशितः। सम्पादनमस्य अकार्षुः श्रीमन्तः पं०अ० चिन्नस्वामिचरणाः। एतेषामेव खण्डदेवमहाभागानां मीमांसाधिकरणानां दीपिका विराजते 'भाट्टदीपिका' वाञ्छेश्वरयज्वभिः प्रणीतया 'भाट्टचिन्तामणि' इति सञ्ज्ञिकया टीकया विलसितेयं श्रीमद्भिर्वेङ्किटसु-ब्रह्मण्यशास्त्रिभिः सम्पाद्य मद्रपुर्यामभिवस्थितात् मद्रासजर्नलमुद्राशालाया-श्चतुस्त्रिंशत्तमे वर्षे प्रकाशिता।

भाट्टदृष्ट्या कर्मविवेचकानां वैदिकवाक्यानामर्थनिष्पत्तौ मीमांसाप्रयुक्तानां न्यायानां सहजतयाऽवबोधनार्थं प्रसिद्धो वर्तते श्रीमद्भिर्लौगाक्षिभास्करैः प्रणीतोऽर्थसङ्ग्रहः। त्रिपञ्चाशत्तमे वर्षे त्यागमूर्ति-टाटाम्बरस्वामिभी रचितया 'दीपिका' सञ्ज्ञिकया हिन्दीटीकयोपेतः 'अर्थसङ्ग्रहः' वाराणस्या चौखम्बासंस्कृत-सीरीजमुद्रणालयेन प्रकाशितः। अस्यार्थसङ्ग्रहस्य व्याख्यात्मिका रामेश्वरशिवयोगि- भिक्षुविरचिता-'अर्थसङ्ग्रह-कौमुदी' चतुःपञ्चशत्तमे वर्षे वाराणस्या अनया एव संस्थया प्रकाशिता। संशोधनञ्चास्याकार्षुः क्षीरसागरोपनामका गणेशशास्त्रिणः। अपराऽर्थसङ्ग्रहकौमुदी नारायणरामाचार्यैष्टिप्पण्यासहिता अष्टाशीतितमे वर्षे अनया एव संस्थया प्रकाश्यमानीता। अर्थसङ्ग्रहे सङ्क्षेपेण वर्णिता मीमांसान्याया आपदेवेन प्रणीते मीमांसान्यायप्रकाशे वैशद्यं भजन्ते। न्यायप्रकाशोऽयं एकादशख्रिस्ते वर्षे मुम्बय्याः कोलभारस्थितात् निर्णयसागरमुद्रणालयात्प्रकाशितः। टिप्पण्यादियोजनपुर- स्सरमस्य सम्पादनमकारि श्रीमद्भिर्बाक्रे इत्युपाह्वैर्गङ्गाधरभट्टात्मजैर्महादेवशास्त्रिभिः। अभ्यङ्करोपाह्ववासुदेव-शास्त्रिविरचितया प्रभाख्यया व्याख्यया समेतोऽयं पुण्यपत्तनस्य भाण्डारकर-प्राच्यविद्यामन्दिरमुद्रणालयात् सप्तत्रिंशत्तमे वर्षे प्रकाश्यमुपयातः। वाराणस्याः प्रथितचरैर्विद्वद्भिः पट्टभिरामशास्त्रिभिरस्य राष्ट्रभाषायां विशदा व्याख्याकारि, या त्र्यशीतितमे वर्षे श्रीलालबहादुरशास्त्रिकेन्द्रीय-विद्यापीठेन प्रकाश्यतामानीता। षोडशे

वर्षे मीमांसाधिकरणानां प्रकाशिका रामकृष्णभट्टविरचिता पूर्वमीमांसाधिकरणकौमुदी वाराणस्या विद्याविलासयन्त्रालयेन प्रकाश्यतामानीता। परिशिष्टभागे वाजपेयारुण्यवैश्वानरेष्टिसञ्ज्ञकानां त्रयाणामधिकरणानां संयोजनपुरस्सरं टिप्पण्या सह अस्याः संशोधनमकार्षुः पण्डितवर्या नेने इत्युपाधिका गोपालशास्त्रिणः। भाट्टमतावलम्बिषु मीमांसकेष्वन्यतमानां कमलाकरभट्टवर्याणां मानमेयप्रकाशकं 'मीमांसाकुतूहलम्' पद्मभूषणविभूषणैः पट्टभिरामशास्त्रिभिः सप्ताशीतितमे वर्षे वाराणस्याः सम्पूर्णानन्दविश्वविद्यालयात् प्रकाश्य अस्माकं दृष्टिपथं समानीतम्। शास्त्रिचरणैरत्र स्थाने स्थाने विशिष्टार्थप्रकाशिका टिप्पणीरपि संयोजिता वर्तते। कमलाकरभट्टानां भ्रातृव्यैर्दिनकरभट्टात्मजैर्गागेति सञ्ज्ञया प्रथितचरैर्विश्वेश्वर-भट्टविरचितो 'भाट्टचिन्तामणिः' नव्यव्याकरणाचार्यैर्मीमांसकशिरोमणिभिः काशीस्थराजकीयप्रधानसंस्कृतपाठशालाध्यापकैः पण्डितसूर्यनारायणशुक्लमहा-भागैर्मयूखटिप्पण्या सूत्रवृत्त्या च सह सम्पादितः। ग्रन्थोऽयं त्रयस्त्रिंशत्तमे वर्षे वाराणस्या चौखम्बासंस्कृतसीरीजमुद्रणालयात् प्रकाशितः। अष्टादशशताब्द्यां विलसतां वासुदेवदीक्षितैर्विरचिता अध्वरमीमांसाकुतूलहवृत्ति आर० चन्द्रशेखरशास्त्रिभिः सह पञ्चापगेशशास्त्रिभिः संशोध्य प्रथमभागान्ता श्रीरङ्गस्थवाणीविलासमुद्रणालयात् प्रकाशिता। तृतीयाध्याये षष्ठपादपर्यन्तो वर्त्ततेऽस्याः प्रथमो भागः। अत्र कालस्योल्लेखो नास्ति। इयमेव मीमांसासूत्रार्थानां विशदावभासिका नवभागेषु व्यवस्थिता अध्वरमीमांसाकुतूहलवृत्तिः श्री लालबहादुरशास्त्रिकेन्द्रीय विद्यापीठेन प्रकाशिता। नवमो भागो द्विसप्ततितमे वर्षे प्रकाश्यतां समागतो वर्तते। सम्पूर्णाया अस्या वृत्तेः सम्पादनमकार्षुः पट्टाभिरामशास्त्रिचरणाः। पञ्चदशतमे वर्षे महामहोपाध्यायपद्वीविभूषितैः पण्डिवर्यै र्नित्यानन्दपन्तमहाभागैर्विरचितया लघुटिप्पण्या सह संशोधिता श्रीकृष्णयज्वकृता मीमांसापरिभाषा वाराणसीस्थितेन विद्याविलासमुद्रणालयेन पञ्चदशश्त्रिस्ते वर्षे प्रकाश्यमानीता। इयमेव वाराणस्याः कृष्णदास-अकादम्या सप्ताशीतितमे वर्षे संस्कृतहिन्दीव्याख्यासहिता प्रकाशिता वर्तते। अत्र संस्कृतव्याख्या डॉ० गजाननशास्त्रि-मुसलगाँकरमहाभागैर्विरचिता। तस्या एव हिन्दीव्याख्यां व्यदधुः डॉ० कमलनयनशर्ममहाभागाः।

यथातीतायां शताब्द्यां भट्टपादैः सह तेषामनुससरणं कुर्वतां विदुषां ग्रन्था विद्वद्भिरस्माकं कृते प्रकाश्यतामानीतास्तथैव प्रभाकरैस्सह तेषां परम्परायाः

प्रकाशनेऽपि वर्तते एतेषां विदुषां महदवदानम्। 'गुरु' इति पदवीविभूषितानां प्रभाकरवर्याणां शाबरभाष्यप्रकाशिका गुरुप्रस्थानस्थापिका टीका 'बृहती' प्रथमाध्यायस्य प्रथमपादपर्यन्ता शालिकनाथमिश्रविरचितया ऋजुविमलया सह पं० चिन्नस्वामिशास्त्रिभिः संशोध्य सम्पादिता। वाराणस्यामवस्थितेन काशी हिन्दू विश्व विद्यालयेन ऊनविंशतमे वर्षे प्रकाश्यमानीता। प्रभाकरमतमनुसरतां शालिकनाथमिश्र वर्याणां 'प्रकरणपञ्चिका' श्रीजयपुरिनारायणभट्टविरचितप्रत्यक्ष- परिच्छेदान्त-न्याय सिद्धिव्याख्या-संवलिता विषमस्थलटिप्पण्यादिना संयोज्य मीमांसारत्नैः श्रीसुब्रह्मण्यशास्त्रिभिः सम्पादिता। वाराणस्याः काशीहिन्दू- विश्वविद्यालयेन एकषष्टितमे वर्षे प्रकाशिता। शालिकनाथानुयायिन आसन् भवनाथमिश्रवर्याः। एभिर्विरचितस्तर्कपादान्तो 'नयविवेको' रविदेवकृतविवेकतत्त्वेन सह एस०के० रामनाथशास्त्रिभिः सम्पाद्य सप्तत्रिंशत्तमे वर्षे मद्रासविश्वविद्यालयात् प्रकाश्यतामानीतः। एवमेव नन्दीश्वरविरचितः 'प्रभाकर-विजयः' श्रीमद्भिरनन्तकृष्णवेदान्तविशारदशास्त्रिभिः सह श्रीमद्भी रामनाथशास्त्रिभिः षड्विंशतमे वर्षे सम्पाद्य कलिकातायाः संस्कृतसाहित्यपरिषदः प्रकाशितः। प्राचीनग्रन्थेषु प्रभाकरपरम्परायां रामानुजाचार्य-विरचितो 'तन्त्ररहस्यमिति' सञ्ज्ञको विशिष्टो ग्रन्थः आर० शामशास्त्रिभिः सम्पादितः। वडोदरास्थितेन केन्द्रीयग्रन्थालयेन त्रयोविंशतितमे वर्षे प्रकाशितः। विंशशताब्द्यां प्रकाशितानां ग्रन्थानामविकलरूपा इयं सूची नास्ति। नेदं विवरणं वा वर्तते प्रकाशितानां सर्वेषां ग्रन्थानाम्। बहवो ग्रन्थाः सन्ति येषां मयात्रोल्लेखो नैव कृतः। सन्त्येतादृशा अपि ग्रन्था येषामिदानीमपि परिचयो मयाऽवाप्तव्यो वर्तते। अत एव विंशशताब्द्यां मीमांसाशास्त्रस्य रक्षणार्थमङ्गीकृतस्य विदुषां व्रतस्य परिश्रमस्य च स्थालीपुलाकन्यायेन प्रकाशनस्यैव वर्तते ममायमल्पतरः प्रयासः।

विंशशताब्द्यां प्रणीताः स्वतन्त्रग्रन्थाः

मीमांसाशास्त्रविचारचातुरीचर्चितचेतसां विंशशताब्द्यां विलसतां मीमांसा-शास्त्रकोविदां वैदग्ध्यप्रकाशिका लेखनी, न केवलं पूर्ववर्तिनामाचार्याणां ग्रन्थानां प्रकाशनेनैव चरितार्थतामुपगता, अपितु मीमांसाशास्त्रस्य समग्रं स्वरूपमुद्घाटयितुं स्वतन्त्राणां ग्रन्थानां रचनयापि नितरां विद्योतते। विंशशताब्द्यां यथा संस्कृतगिरा-निर्मिता स्वतन्त्र ग्रन्थाः केचिददृष्टिपथं समायान्ति तथैवास्याः शताब्द्याः पूर्वस्मिन् भागे आङ्ग्ल भाषा-प्रणीता ग्रन्था अपि प्रागल्भ्यमात्मनः प्रकटीकुर्वन्ति।

विंशशताब्द्याश्चरमे भागे यथाकथञ्चिद्राष्ट्रभाषायामपि शास्त्राध्ययनाध्यापनस्य समारब्धायां परम्परायां केचन राष्ट्रभाषाविभूषिता ग्रन्था अपि दृष्टिपथं सम्प्राप्तास्सन्ति। भाषाभेददृष्ट्या त्रिभिर्बिन्दुभिर्विभक्तेस्ष्वेतेषु ग्रन्थेषु स्थालीपुलाकन्यायेन केचिदत्र विव्रियन्ते।

1. मीमांसाऽभ्युदयः - 1925

तञ्जापुरान्तर्गन्तश्रीमत्पञ्चनदस्थ-संस्कृतमहाकलाशालाप्रधान-मीमांसकैः श्रीशैलताताचार्यशिरोमणिभिर्विरचितो 'मीमांसाऽभ्युदय' सञ्ज्ञको ग्रन्थः तञ्जौरस्थया डिस्ट्रिक्ट बोर्डसंस्थया प्रकाशितः मुद्रितश्च कुम्बाकोणमवस्थिताच्छ्रीगोपाल-विलासमुद्रणालयात्पञ्चविंशतमे वर्षे। श्रीमद्भिस्ताताचार्यवर्यैर्विरचितोऽयं प्रबन्धः 'अवतरण-विद्यास्थान-प्रबन्धप्रबन्धाधिकार-प्रतिपाद्य-प्रमाण-प्रमेय-प्राभाकर-सेश्वरमीमांसा-सङ्कर्षप्रयोजनसञ्ज्ञकेषु नवसङ्ख्यकेष्वधिकारेषु व्यवस्थापितो वर्तते। श्रीमद्भिस्ताताचार्यमहाभागैरत्र मीमांसाशास्त्रप्रवर्तकाज्जैमिनेरारभ्य गागाभट्ट पर्यन्तानां प्रसिद्धानां मीमांसकानां सङ्क्षिप्तं विवरणं प्रतिपाद्य अन्येषामप्रसिद्धानामपि मीमांसकानां रचनाभिः सहात्र विवरणमुपन्यस्तम्। प्रमाणप्रमेयस्वरूपमपि सङ्क्षेपेणात्र विवेचितं वर्तते। सेश्वरमीमांसाधिकारेण सह सङ्कर्षाधिकारस्यात्र संयोजनेनास्य ग्रन्थस्यान्येभ्यो ग्रन्थेभ्यो वैशिष्ट्यमपि प्रकाशितं वर्तते। श्रीमद्भिस्ताताचार्यमहाभागैरस्मिन्नधिकारे न्यायपरिशुद्धि-मीमांसा-पादुका-सेश्वरमीमांसासञ्ज्ञकान् ग्रन्थान् उदाहृत्य सेश्वरमीमांसकानामपि दृष्टिरत्र प्रकाशिता वर्तते। यद्यपि वेदस्य नित्यत्वं निरपेक्षप्रामाण्यमेतेषां सेश्वरमीमांसकानामप्यभीष्टं तथापि ईश्वरास्तित्व-साधनाय इमे वदन्ति "यदस्तु कामं, अस्ति च वस्तुत ईश्वरो नाम सर्वशक्तः सर्वज्ञः पुरुषः, अथापि स यथा नित्यस्तथा वेदाभिधानः शब्दराशिरपि न तु पुनरेतस्य तत्कर्तृत्वे प्रमाणं पश्याम इति नैयायिकान् प्रतिवदन्ति। एवमेव ईश्वराज्ञाया विध्यर्थत्वमपि एभिरङ्गीक्रियते सेश्वरमीमांसकैः। अनया रीत्या वेदाविरुद्धतया ईश्वरास्तित्वप्रतिपादनाय सेश्वरमीमांसकानां प्रवृत्तिं निरूपयद्भिरेभिस्ताताचार्यवर्यैः कर्मणि श्रद्धासंवर्द्धनमेव परम्परायाम् अनीश्वरवादस्य बीजं प्रत्यपादि। सङ्कर्षाधिकारे चतुर्णां सङ्कर्षणकाण्डानामर्थाः प्रतिपञ्चहृदयदृशा प्रतिपादयाञ्चक्रुरिमे।

तत्र प्रकाशन्ते इमे अर्थाः-प्रथमे सर्वेषां मन्त्रविशेषाणां देवतातत्त्वप्रदर्शने तात्पर्यमिति प्रदर्शितम्। द्वितीयाध्याये विध्यर्थवादनामधेयानां मन्त्रदेवताविषयत्वम्। तृतीयेऽध्याये देवतातत्त्वं स्वेच्छाविग्रहवत्त्वादिगुणगणालङ्कृतम्। चतुर्थाध्याये देवता

(?) फलं सत्कर्मणामपवर्गाधिकारिणः तादात्म्यलक्षणापवर्गफलमिति। इतः परं शिरोमणिभिस्ताताचार्यपादैरधिकारोऽयं -"स्वरूपमादौ तद्भेदस्तदुपासनपूर्वकम्।

फलञ्च देवताकाण्डे देवतानान्तु कथ्यते।।" इतीयां वेङ्कटनाथात्मजस्य वरदराजाचार्यस्य अधिकरणसारावलीव्याख्यानेऽधिकरणचिन्तामणौ विद्यमानाम् उक्तिं परामृशद्भिरुपसंहृतोऽयं प्रबन्धः। श्रीमतां ताताचार्याणामयं प्रबन्धो विदुषामाह्लादाय यथा पर्याप्तस्तथैव मीमांसानये प्रविविक्षुभ्योऽपि नितरामात्मन उपादेयतामाविष्करोति।

2. तन्त्रसिद्धान्तरत्नावलिः 1944

वाराणस्यां मीमांसादर्शनस्य गौरवमयी परम्परा प्रामुख्येन श्रीमतां कुप्पुस्वामिचरणानामन्तेवासिभिः पण्डितवर्यैं अ० चिन्नस्वामिशास्त्रिचरणैः प्रवर्तिता। न केवलमेभिर्विविधानां मीमांसाग्रन्थानां सम्पादनेन टिप्पण्या व्याख्यया च प्राक्तनैराचार्यैः प्रकटितानां विचाराणां परिवर्द्धनेन समाराधिता मीमांसकानां परम्परा, अपितु काशीहिन्दूविश्वविद्यालयस्य धर्मविज्ञानसङ्काये आत्मनोऽध्यापनेनापि भृंश संवर्द्धितं वर्तते मीमांसाशास्त्रम्। मीमांसासागराः पद्मभूषणविभूषणाः पट्टाभिरामशास्त्रिचरणा एतेषामेवान्तेवासिष्वन्यतमत्वेन ख्यातिमवाप्ताः। मीमांसादर्शने एभिः पं० चिन्नस्वामिमहाभागैर्विरचितः 'तन्त्रसिद्धान्तरत्नावलि'-सञ्ज्ञको विराजते मीमांसायाः प्रकरणग्रन्थः। काशीहिन्दूविश्वविद्यालयाच्चतुश्चत्वारिंशत्तमे ख्रिस्ते वर्षे चिन्नस्वामिमहाभागानामन्तेवासिभिः पण्डितवर्यैः पट्टाभिरामशास्त्रिभिः संशोध्य भाट्टप्राभाकरसिद्धान्तभेदप्रदर्शकपट्टिकासंयोजनेन च सम्पाद्य प्रकाशितोऽयं ग्रन्थः।

मीमांसाशास्त्रनदीष्णैः पं० चिन्नस्वामिशास्त्रिचरणैर्मीमांसाशास्त्रस्य प्रायशः सर्वेषामेव सिद्धान्तानां प्रकाशनार्थं ग्रन्थोऽयं त्रिषु परिच्छेदेषु विभक्तो वर्तते। प्रथमपरिच्छेदे मङ्गलाचरणेन सह स्वाध्यायविधि-धर्मलक्षण-लिङर्थार्थवाद-मन्त्रनामधेयस्मृतिशिष्टाचारादयः पदार्थाः सम्यक्तया विवेचिताः द्वितीये प्रकाशे प्रत्यक्षादीनां प्रमाणानां स्वरूपं विविच्य इन्द्रियमनसे-न्द्रियार्थसन्निकर्षादीनां विवेचनया सह मीमांसादृष्ट्या पदार्थ-निरूपणप्रसङ्गे शब्दस्य द्रव्यत्वमपि शास्त्रिचरणैरत्र प्रकाशितम्। गुणनिरूपणपुरस्सरं कर्मजातिशक्त्यभावपदार्थास्तृतीये प्रकाशे शास्त्रिचरणैर्विवेचितास्सन्ति। द्विविधव्याप्तिनिरूपणपूर्वकमनुमानस्य द्वैविध्यं संसाध्य शास्त्रिचरणैश्चतुर्थे प्रकाशेऽनुमानं प्रादर्शि। आकाङ्क्षादिसहकारिकारण-

निरूपणपुरस्सरं शब्दनिरूपणं पञ्चमे प्रकाशे निष्पादितं वर्तते। उपमानार्थापत्ति-प्रमाणे चरमे षष्ठ-प्रकाशे निरूपिते।

अस्य तन्त्रसिद्धान्तरत्नावलिसञ्ज्ञकस्य ग्रन्थस्य द्वितीयपरिच्छेदस्य प्रथमे प्रकाशे अनुपलब्ध्यर्थभावनाऽपूर्वदर्शपूर्णमासयागकर्मभेदकर्मभेदप्रमाणादयो महत्त्वपूर्णविषया निरूपितास्सन्ति। अस्य परिच्छेदस्य द्वितीये प्रकाशेअङ्गत्व-निरूपणान्तरं श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यासञ्ज्ञकानां विनियोजकानां प्रमाणानां स्वरूपं प्रदर्श्य बलाबलमप्येतेषामत्र शास्त्रिचरणैः परम्परानुरूपमुपवर्णितम्। अस्मिन्नेव प्रकाशे क्रत्वर्थपुरुषार्थस्वरूपविवेचनेन सह अनारभ्याधीतन्यायोऽप्यत्र चिन्नस्वामिशास्त्रिचरणैः प्रकाशितः। अस्य द्वितीय-परिच्छेदस्य तृतीये प्रकाशे प्रयोज्यत्वेन सह प्रयोगविधिं निरूप्य शास्त्रिचरणैरत्र श्रुत्यर्थपाठस्थानमुख्य-प्रवृत्तिसञ्ज्ञकानां प्रमाणानां स्वरूपं विविच्य एतेषां बलाबलमपि परम्परानुरूपमत्रैव साधितम्।

ग्रन्थस्य तृतीये परिच्छेदे चत्वारः प्रकाशाः शास्त्रिचरणैर्नियोजिताः। तत्र प्रथमे प्रकाशे-अतिदेशस्वरूपं प्रत्यपीपदच्छास्त्रिचरणाः। द्वितीये प्रकाशे ऊहमूह्य तृतीये बाधो निरूपितः। तन्त्र-प्रसङ्गौ चतुर्थे प्रकाशे निरूपितौ।

ग्रन्थस्य चतुर्थ-परिच्छेदस्य प्रथमे प्रकाशे शास्त्र-सारनिरूपणपुरस्सरं विधेस्त्रैविध्यं शास्त्रिचरणैः प्रदर्शितम्। द्वितीये प्रकाशे अभ्युदयनिःश्रेयसत्वभेदाच्छ्रेयं द्विविधा विभज्य स्वर्गपुत्रपश्वादिजन्यं सुखमभ्युदयत्वेन निरूप्य 'निःश्रेयसस्तु मोक्ष एव' इत्यनया पङ्क्त्या मोक्षस्य निःश्रेयसत्वं प्रतिपाद्य प्रपञ्चसम्बन्धविलयत्वमिति तस्य स्वरूपं प्रतिपादितम्। "मोक्षार्थिभिर्विवेकज्ञानमात्रेण न कृतार्थमन्यमानैस्थात-व्यम् किन्तु पूर्वोक्तरीत्याऽशरीरसम्पादने यतितव्यमिति" इत्यनया शास्त्रिचरणानां पङ्क्त्या ज्ञानेन सह नित्यनैमित्तिककर्मानुष्ठानस्याभिव्यक्तेरुभयोः ज्ञानकर्मणोः समुच्चयस्यैव मोक्षसाधनत्वं शास्त्रिचरणानामभिमतमिति स्पष्टं परिलक्ष्यते।

ग्रन्थस्यान्ते परिशिष्टभागे सम्पादकैरत्र प्रमाणेषु प्रत्यक्षादीनां स्वरूपमुभयोर्मतेन प्रदर्श्य शब्दार्थ-लिङर्थगुणज्ञानकर्मसामान्याभावादीनां पदार्थानां स्वरूपे उभयोः भाट्टप्राभाकरयोर्मतभेदः प्रदर्शितः। येषु स्थलेषु प्रकाशितो वर्तते मतभेदस्तेषां स्थलानां विवेचनस्य निष्कर्षप्रदर्शनार्थं पृष्ठद्वयपरिमिता 'भट्टप्रभाकर- मतभेदनिष्कर्षपट्टिका'-प्यत्र समायोजिता वर्तते। परिशिष्टभागस्यानन्तरं 'सङ्क्षिप्तशब्दविवरणम्' इत्यस्य शीर्षकस्याधिकारे ग्रन्थानामाद्याक्षरप्रदर्शनव्याजेनात्र परामृष्टानां चतुश्चत्वारिं-

शत्सङ्ख्यकानां पुस्तकानां सूचीं प्रदर्श्य ग्रन्थस्यास्य समालोचनात्मकं स्वरूपमपि प्रदर्शितं भङ्गिमान्तरेण सम्पादकमहाभागैः।

लेखकसम्पादकयोरुभयोरपि प्रतिभया संवलितोऽयं ग्रन्थः सम्पूर्णया द्वादशलक्षण्या राद्धान्तेषु प्रमुखानां प्रकाशकत्वाद्यथा मीमांसानयविवेचन-विचक्षणानां विदुषां परितोषाय क्षमस्तथैव कठिनानामपि सिद्धान्तानां सरलतया प्रतिपादना-च्छात्राणामप्यस्मिन् मीमांसाशास्त्रार्णवे सन्तरणार्थमात्मनस्तरणीत्वमाविष्करोतीति मन्ये।

3. मीमांसानयमञ्जरी 1984, 1992

विंशशताब्दिकालविभूषितेषु मीमांसकेषु वाराणस्यां विभूषितैर्विद्यासागरैः पद्मभूषणविभूषणैः पट्टाभिरामशास्त्रिचरणैर्विविधानां मीमांसाग्रन्थानां व्याख्यया सम्पादनेन च यथा परम्पराया महती सेवा निष्पादिता तथैव स्फीतया आबाल-वृद्धतोषिण्या सरसया भाषया विरचितया भागद्वयपरिमितया मीमांसानयमञ्जर्या विलुप्तप्राया मीमांसान्यायाः पुनरपि प्रकाशितास्सन्ति। अत्र चतुरशीतितमे ख्रिस्ते वर्षे वाराणस्याः सम्पूर्णानन्द विश्वविद्यालयेन प्रकाशिते प्रथमभागे मीमांसाशास्त्रस्य तृतीयाध्यायस्य अष्टमपादपर्यन्तानाम् एकोनविंशत्यधिकानां द्विशतानां (219) विविधेष्वधिकरणेषु विद्यमानानां न्यायानां शास्त्रिचरणैः स्फीतया भाषया स्वरूपं प्रादर्शि। अस्य प्रथमभागस्य परिशिष्टभागे शास्त्रिचरणैः भाट्टमीमांसायां प्रविविक्षुभ्यो मानमेयार्थसङ्ग्रहोऽपि मीमांसादृष्ट्या प्रकाशितो वर्तते। द्विनवतितमे ख्रिस्ते वर्षे प्रकाशिते द्वितीयभागे चतुर्थाध्यायस्य प्रथमपादादारभ्याष्टमाध्यायस्य चतुर्थपादान्तराले विभिन्नेष्वधिकरणेषु ऊनषष्ट्यधिकानां द्विशतानां न्यायानामत्र शास्त्रिचरणैर्वैशद्यं निष्पादितम्। अस्य द्वितीयाध्यायस्य परिशिष्टे मीमांसाधुरीणैरेभिः मीमांसानय-प्रकाशितस्य यागात्मकस्य कर्मणो निष्पत्तये आवश्यकानामनेकेषामाधानाग्नि-होत्रवेदिनिर्वापादीनां प्रायशो चतुरशीतिसङ्ख्यकानां पदार्थानां स्वरूपमपि प्रदर्शितं वर्तते। द्वितीयभागेऽस्मिन् शास्त्रिचरणैर्नवमात्पादादारभ्य द्वादशाध्यायपर्यन्ता अन्ये चत्वारोऽध्याया अस्यां शताब्द्यां विद्यमानेभ्यः परित्यक्ता इति मन्ये।

4. मीमांसादर्शन-विमर्शः- 1976

मीमांसाशास्त्रज्ञेषु विद्वत्सु प्रतिष्ठितानां मीमांसासागराणां पट्टाभिरामशास्त्रि-चरणानामन्तेवासिभिरुपाध्याय इत्युपाधिकैः डॉ० वाचस्पतिमहाभागैर्वेदस्वरूप-विचारादारभ्य प्रामाण्यस्य स्वतस्त्वपरतस्त्वविचारपर्यन्तानामनेकेषां प्रमाणप्रमेयख्याति -ज्ञानादीनां विषयाणां समालोचनात्मिकया पद्धत्या विवेचनात्मको

मीमांसादर्शन - विमर्शसञ्ज्ञको ग्रन्थोऽकारि:। दिल्लीस्थितेन भारतीयविद्या-प्रकाशनेनायं ग्रन्थ: षड्सप्ततितमे ख्रिस्ते वर्षे प्रकाशित:। मीमांसाशास्त्रमूर्धन्यानां डॉ० उपाध्यायमहाभागानामनुसन्धान-प्रावीण्यप्रकाशकोऽयं ग्रन्थ: सप्तपरिच्छेदेषु व्यवस्थापितो वर्तते। ग्रन्थस्य प्रथमपरिच्छेदे वेदस्वरूपं विचार्य मन्त्रब्राह्मणो-पनिषद्दारण्यकात्मके निखिले एव वेदे जैमिन्यभिमतमलौकिकार्थ-वेदकत्वमे-भिरुपाध्यायवर्यैरस्मिन् परिच्छेदे साधितम्। द्वितीये परिच्छेदे न्यायमतपरिशीलन-पुरस्सरं वेदे त्रेधापुरुषप्रवेशसम्भावनां निरस्य वेदस्यापौरुषेयत्वं प्रकाशितम्। तृतीये परिच्छेदे प्रमाणलक्षणपरीक्षणं प्रतिपाद्य चतुर्थे परिच्छेदे मीमांसा-दृष्ट्या भेदप्रतिपादनपुरस्सरं प्रमाणस्वरूपं विवेचितम् वर्तते। डॉ० उपाध्यायमहाभागैर्ग्रन्थस्य पञ्चमे परिच्छेदे ख्यातिस्वरूपं विविच्य षष्ठे परिच्छेदे ज्ञानमीमांसा विवेचिता वर्तते। सप्तमे परिच्छेदे साङ्ख्यनैयायिकसौगतमतपरिशीलनपुरस्सरमेभि: प्रामाण्यस्य स्वतस्त्वं समालोचनात्मिकया दृष्ट्या साधितम्। आचार्य वर्याणामुपाध्यायमहाभागानां समालोचनशक्त्या सह मीमांसाशास्त्रवैदध्य- प्रकाशकोऽयं ग्रन्थोऽनुसन्धृत्सुभ्यो महतीमात्मन उपयोगितामाविष्करोति।

5. पूर्वमीमांसा इन इट्स सोर्सेस-1964

विंशशताब्द्या मध्यकालपर्यन्तानां मीमांसाशास्त्रानुसन्धानकर्तृणां मध्ये प्रयागवास्तव्यानां महामहोपाध्यायपदवीजुषां सर-गङ्गानाथ-झा-महाभागानां नाम विशेषरूपेण उल्लेखनीयं वर्तते। अनेकेषां मीमांसाग्रन्थानां सम्पादनेन सह उभयोरपि वार्तिकयोरेभिराङ्ग्लभाषायामनुवादात्मक महत्त्वपूर्णं कार्यं निष्पादितं वर्तते। सर्वेषां मीमांसा-वर्ण्य-विषयाणामेकत्र प्रकाशनाय एभि: 'पूर्वमीमांसा-इन-इट्स सोर्सेस-सञ्ज्ञक: स्वतन्त्रो ग्रन्थ: प्रणीत:। वाराणस्यामवस्थितेन काशी हिन्दू विश्वविद्यालयेन चतु:षष्टितमे ख्रिस्ते वर्षेऽयं प्रकाश्यतामानीत:। महामहोपाध्याय-वर्यैरयं ग्रन्थो द्वात्रिंशदध्यायेषु विभक्तो वर्तते। अत्र गन्थस्य प्रारम्भे प्रस्तावनायां भारतीयदर्शनशास्त्रपरम्परायां मीमांसाशास्त्रस्य स्थानं प्रयोजनञ्च सामान्यरूपेण प्रतिपाद्य प्रथमपरिच्छेदा-दारभ्य नवमाध्यायपर्यन्तं शबरस्वामिप्रभाकरकुमारिल मतपरिशीलनपुरस्सरम् आत्ममोक्षमनसिन्द्रियेश्वरजगत्स्वर्गजातिपर्यन्ता: पदार्था मीमांसाशास्त्रदृष्ट्या विवेचितास्सन्ति। दशमाध्याये प्रमाणस्वरूपं प्रदर्श्य एकादशाध्यायादारभ्याष्टादशाध्यायपर्यन्तं प्रत्यक्षानुमानशब्दोपमानार्थापत्त्य-भावसञ्ज्ञकानि षड्विधानि प्रमाणानि झामहाभागै: शबरस्वामिप्रभाकरकुमारिलानां

त्रयाणामाचार्याणां दृष्ट्या निरूपितानि सन्ति। एकोनविंशाध्याये शास्त्रारम्भेन सह धर्मस्वरूपं विवेच्य परम्परानुरूपं वेदानां धर्मप्रतिपादकत्वमपि झामहाभागैस्त्र प्रतिपादितम्। विंशाध्यायादारभ्य एकत्रिंशदध्यायपर्यन्तं मन्त्रस्मृत्यपूर्वकर्मभेद-प्रकृतिविकृतिक्रत्वर्थपुरुषार्थत्वयज्ञस्वर्गदेवताधिकारभार्याधिकारशूद्राधिकाराति-देशोहबाधतन्त्रप्रसङ्गसञ्ज्ञका मीमांसादर्शनस्य मुख्यविषया झा-महोदयैः सम्यगतया विवेच्य प्रतिपादिताः द्वात्रिंशत्तमेऽध्याये यज्ञदक्षिणास्वरूपं विवेचितम्। त्रयस्त्रिंशत्तमेऽध्याये झामहाभागैर्विविधेषु शास्त्रेषु मीमांसायाः प्रभावं निरूप्य अस्या निखिलशास्त्रोपयोगिनी महत्ता यत्नेन प्रकाश्य समुपसंहृतोऽयं ग्रन्थ इति शम्।

आङ्ग्लभाषाप्रणीता अन्या रचनाः

अन्यैरपि विंशशताब्द्यां विद्यमानैर्विद्वद्भिराङ्ग्लभाषया विरचिता रचना अपि उल्लेखनीयाः सन्ति। विस्तारभयादत्र दिङ्मात्रप्रदर्शनार्थं केषाञ्चिदेव नामोल्लेखः क्रियते-

रचना	रचनाकार	प्रकाशनसंस्था कालश्च
1. कर्ममीमांसा	प्रो० ए०बी०कीथः	हेरीटेज ऑफ इण्डिया सीरीज 1921
2. ए ब्रीफ स्केच आफ द पूर्वमीमांसा	पी०वी०काणे	आर्य-भूषण-प्रेस-पूना, 1924
3. मीमांसा जुरीप्रूडेन्स- द-सोर्स ऑफ हिन्दू ला	ए०एस०नाटराज अय्यर	गङ्गानाथ-झा रीसर्च-इन्स्टीट्युट, अलाहाबाद, 1952
4. मीमांसा-द सीक्रेट ऑफ द सेक्रेड बुक्स ऑफ हिन्दूज	एन०बी०थडनी	भारतीय रीसर्च-इन्स्टीट्युट दिल्ली-19
5. मीमांसा-द वाक्यशास्त्र ऑफ एनसिएण्ट इण्डिया, वाल्यूम वन	जी०वी०देवस्थली	बुकसेलर्स पब्लिशिङ् कम्पनी, बाम्बे, 1950
6. इस्टीमोलाँजी ऑफ द भाट्टस्कूल ऑफ पूर्वमीमांसा	गोवर्द्धन पी भट्ट	चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 19
7. मीमांसा फिलासफी एण्ड कुमारिलभट्ट	विश्वनारायणशास्त्री	राष्ट्रिय संस्कृत संस्थान, न्यू दिल्ली, 1991

मीमांसा-दर्शन का विवेचनात्मक इतिहास

मीमांसाशब्दस्य व्युत्पत्या समारब्धेऽस्मिन् ग्रन्थे शास्त्रस्यास्य प्रवर्तकस्य जैमिनिमहर्षेः पूर्वाऽपरां उभयविधां मीमांसकानां परम्परां प्रदर्श्य सम्पूर्ण-मीमांसाया वर्ण्यविषयस्यात्र ग्रन्थकृद्भिर्मूसलगाँवकरोपनामकैर्गजाननशास्त्रिमहाभागैरोचकतया राष्ट्रभाषायां निरूपणं कृतं वर्तते। प्रथम-परिच्छेदे मीमांसाया व्यापकतां निरूप्य निखिलानां द्वादशाध्यायानामत्र स्वरूपमपि सङ्क्षेपेण न्यरूपि शास्त्रिचरणैः। द्वितीय-परिच्छेदे उपवर्षमारभ्य वाञ्छेश्वरयज्वपर्यन्तानां षष्ठिसङ्ख्यापरिमितानां मीमांसाविचारचातुरीचर्चितचेतसां मीमांसकानामत्र कालनिर्देशपुरस्सरं ग्रन्थविचाराः प्रमाणयुक्तिसंयोजनपुरस्सरं समीक्षिताः। अस्मिन्नेव परिच्छेदे शास्त्रि-चरणैर्वतमानकालीनानां विदुषामुल्लेखपुरस्सरं मीमांसादर्शनस्य उपयोगितया सह तस्यानभिव्यक्तं महत्त्वमभिव्यक्तम्। शास्त्रिचरणैर्विरचित्तोऽयं ग्रन्थः संस्कृतभाषाया-मप्रवीणानामपि मीमांसानये प्रवेशाय प्रकटयत्यात्मनो महतीमुपयोगिताम्।

राष्ट्रभाषया निर्मिता अपरे ग्रन्थाः

विंशशताब्द्यां विद्यमानेषु मीमांसकेषु मण्डनमिश्रकल्पानां डॉ० मण्डनमिश्रवर्याणां मीमांसादर्शनसञ्ज्ञकेन ग्रन्थेन सह अन्ये अपि केचन राष्ट्रभाषया लिखिता ग्रन्था दृष्टिपथं समागताः सन्ति। एतेषामत्र त्रयाणामुल्लेखः क्रियते-

1. "मीमांसादर्शन (महर्षि जैमिनि-प्रवर्तित विचारशास्त्र का समालोचनात्मक अध्ययन" रमेश-बुक-डिपो, त्रिपोलिया बजार, जयपुर 1960, डॉ० मण्डन मिश्र
2. तन्त्रवार्तिक का स्मृतिपाद, ईस्टर्न बुक-लिंकर्स, दिल्ली, 1989 - डॉ० विनीता सिन्हा
3. "मीमांसादर्शन का उद्भव और विकास-" सुरभारती-प्रकाशन, कानपुर, 1989 - डॉ० प्रेमा अवस्थी

मीमांसायाः प्रासङ्गिक-सन्दर्भाः

विंशशताब्द्यां वाराणस्यां विद्यमानाना म०म०अ०चिन्नस्वामिचरणामन्तेवा-सिभिः पट्टाभिरामशास्त्रिचरणैः स्वविरचितायां नत्रमञ्जर्यां मीमांसान्यायप्रकाशस्य हिन्दी व्याख्यायामपि मीमांसान्याया महता कौशलेन प्रयासेन च सामयिकेषु च सन्दर्भेषु विनियोजितास्सन्ति। राष्टस्यैकरूपतासन्दर्भे विभिन्नानां स्थानीयनिकायानां

केन्द्रेण सह साक्षात्परम्परया वा समन्वये शास्त्रिचरणैर्नञमञ्जर्यामुपन्यस्तेषु नयेषु होलाकाधिकरणेन सह आरुण्याधिकरणमप्यस्मच्चेतसामावर्जने क्षमम्।

मीमांसाशास्त्रस्य होलाकाधिकरणे भारतवर्षस्य विविधेषु प्रदेशेषु प्रचलितानामुत्सवानां व्यवस्था तत्तत्प्रदेशपर्यन्ता वर्तते निखिलराष्ट्रव्यापिनी वेति समुत्पन्ने संशये तत्तत्प्रदेशीया व्यवस्था इति पूर्वपक्षमतं निराकर्तुं सिद्धान्तेनोच्यते यदेतेषां होलाकादीनाम् उत्तरपूर्वपश्चिमादिप्रदेशीयानामुत्सवानां तत्तत्प्रदेशेन व्यवस्थाया निष्पादने आचाराणां श्रुतिस्मृतिमूलकत्वादेतेषां मूले कल्पितव्ये स्मृतौ श्रुतौ वा प्राच्यदक्षिण इत्यादीनां पदानां सन्निवेशः करणीयो भवेत् परन्त्वत्र के प्राच्याः के दाक्षिणात्या इति निर्वचनं कर्तुं न शक्यते। यदि प्राच्यां भवः प्राच्य इति निर्वचनं क्रियते तर्हि प्राचीं गतः प्राच्य इत्यत्र व्यभिचारो जायते। प्राच्या आगतः प्राच्यः प्राच्यामुद्भुतः प्राच्यो वा इत्यादीनामनेकासां व्युत्पत्तिप्रक्रियाणामस्तित्वे प्राच्यादीनामनिर्वचनदशाप्राप्तायां निखिलराष्ट्रपर्यन्ता व्याप्तिः सर्वेषां प्रादेशिकानामुत्सवानामङ्गीक्रियते। अयं सिद्धान्तः प्राकृतेनार्थेन सह निखिलभारतवर्षस्य एकरूपताया अपि अवबोधे उपयोगी वर्तते, अस्यार्थस्य पृथक्तया प्रतिपादनमनपेक्षितमेव मन्ये।

यद्यपि नञमञ्जर्यां पट्टाभिरामशास्त्रिचरणैरयमर्थः शब्दतो न प्रकाशितः परन्त्वापदेवविरचितस्य मीमांसान्यायप्रकाशाख्यस्य ग्रन्थस्य हिन्दीव्याख्यायां पादटिप्पणीषु तत्र-तत्र प्रकृतार्थस्य राष्ट्रियसमन्वयेऽर्थे शब्दतोऽपि प्रकाशितो वर्तते।

1. मीमांसान्यायप्रकाश-ग्रन्थस्य 'आरुण्यस्यापि क्रयाङ्गत्वं तृतीयाश्रुत्या न चामूर्त्तस्य तस्य कथं क्रयाङ्गत्वमिति वाच्यम्। एकहायनीरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तौ' इत्यस्य सन्दर्भस्य हिन्दीव्याख्यायामारुण्यस्य गुणस्यामूर्तत्वादयोग्यतया क्रयभावनायामन्वयेऽसङ्गतौ प्राप्तायामेकहायनी गोरूपद्रव्यविशेषणतया पारम्परिकरीत्या क्रयभावनायां पार्ष्ठिकमन्वयं प्रदर्श्य टिप्पण्यामयं सिद्धान्तः प्रजातन्त्रस्य परिचायक इत्युक्तम्। अत्र शास्त्रिचरणैरुच्यते यत्साक्षाद्रूपेण विचारार्थं प्राप्ता योजना मन्त्रिणा तावन्नानुमन्यते यावदियं समुचितेन माध्यमेन नैव समायाति। एवमेवाग्रेऽपि नवस्थानेषु शास्त्रिपादैः शास्त्रीय-सिद्धान्तानां राष्ट्रियसन्दर्भेषु समायोजनं प्रदर्शितं वर्तते। एतेषु स्थालीपुलाकन्यायेन दर्शपूर्णमासप्रयाजयोः समन्वय-प्रापके प्रकरणप्रमाणे समायोजिता टिप्पणी प्रस्तूयते-श्रौतयज्ञेषु पदार्थाः पुरुषार्थ-क्रत्वर्थ-क्रतुयुक्त-पुरुषार्थतया त्रिविधास्सन्ति। इत्यत्र शास्त्रिपादैर्निरूपिताः। अग्रे

लिखन्ति-यद्देशस्य स्वतन्त्रताखण्डतात्मकस्य फलस्य सिद्ध्यै कल्पितं प्रजातन्त्रं क्रतुस्थानापन्नः पुरुषार्थः। अस्यै प्रजातन्त्रात्मिक्यै क्रतुसिद्ध्यै केन्द्रीयं शासनं क्रत्वर्थत्वेन व्यवस्थापितम्। प्रादेशिकानि निखिलानि शासनानि तस्य क्रत्वर्थभूतस्य केन्द्रशासनस्य सहायकान्येव भवितुमर्हन्ति। इत्यादिभिर्विविधाभिष्टिप्पणीभी राष्ट्रैक्यस्य प्रकाशने मीमांसान्यायानां समायोजनस्य शास्त्रिचरणानां भावना सुतरामभिव्यज्यते।

विमर्शः

जैमिनिमहर्षिभिः स्वविरचितैः सूत्रैः प्रवर्तितं, श्रीकृष्णयज्वापर्यन्तैर्मीमांसकैः परिभाषितं मीमांसादर्शनमासन्नपरिसमाप्तायां विंशशताब्द्यां व्याख्या सम्पादनस्वतन्त्र-ग्रन्थलेखनप्रक्रियाभिः पद्धतिभिर्व्यवस्थापितं व्याख्यातं परिवर्धितञ्च। न केवल-मस्मिन्काले विद्यमानैर्विद्वद्भिः प्राक्तनानां ग्रन्थानां प्रकाशनेन व्याख्यया तेषां परिभावनेनैवच सन्तुष्टिरवाप्ता अपितु निखिलायां परम्परायां निहितस्यार्थतत्त्वस्य कोमलमतिभ्यः प्रकरणग्रन्थानां रचनयाऽवबोधनार्थमपि वर्तते एतेषामुल्लेखनीय-मवदानम्। न केवलमत्रैव विरामता परिलक्ष्यते एतेषां विचारसरणिरपितु प्रासङ्गिकेऽपि चिन्तने मीमांसानयानां विनियोगाय एतेषां कार्येभ्यः प्रवृत्तिप्रवर्तिका प्रवर्तनाऽपि सातत्येनास्माभिरवाप्यते।

2
भाट्टमीमांसायां कार्यकारणभावविमर्शः

भारतीय-दार्शनिकप्रस्थानेषु विचार्यमाणेषु विषयेषु कार्यकारणभावविमर्शस्य प्रामुख्यं परिलक्ष्यते। कार्यकारणभावसन्दर्भे असत्कार्यवादसत्कार्यवाद-विवर्तवादारम्भवादा इति चत्वारो वादाः प्रथितचराः सन्ति। एतेषु शून्यवादिनां सदसद्विरहितस्य शून्यस्य वस्तुजातस्याधिकरणत्वाद्वस्तुजातस्य च संवृत्तिसत्ताया-मस्यैव विवर्तत्वादेतेषां सिद्धान्तोऽयमसत्कार्यवाद इत्युच्यते। साङ्ख्यनये प्रकृतिरूपस्य त्रिगुणात्मकस्यैकस्यैव तत्त्वस्य निखिलजगन्मूलकत्वात्कार्य-स्याविर्भावात्प्रागपि उपादानकारणे विद्यमानत्वप्रतिपादनादेतेषां सिद्धान्तः कार्यकारणसन्दर्भे सत्कार्यवादसञ्ज्ञया विभूषितो वर्तते। कारणस्य सद्भावेऽप्युत्पत्तेः प्राक् कार्यस्यास्तित्वं निराकुर्वतां नैयायिकानां वैशेषिकानाञ्च कार्योत्पत्तिवाद आरम्भवाद इति सञ्ज्ञया प्रसिद्धो वर्तते। निष्प्रपञ्चस्य ब्रह्मणो व्यावहारिक्यामेव दशायां प्रतीयमानस्य जगत उपादानकारणत्वेनाङ्गीकारात् पारमार्थिक्यामवस्थायामस्य बाधात् ब्रह्मणश्च त्रिविधायामप्यवस्थायामबाधाच्च 'सदेव सर्वम्' इति वदतामद्वैतवादिनां सिद्धान्तो दार्शनिकक्षेत्रे विवर्तवाद इत्यभिधानेन व्यवह्रियते।

भारतीय-दर्शनस्य वैदिकवर्गे प्रतिष्ठितेषु दर्शनेषु वैदिकवाक्यविश्लेषणेन वाक्यार्थनिर्णयप्रक्रिययाऽर्जितदार्शनिकस्वरूपस्य मीमांसादर्शनस्य भाट्टप्रस्थाने विवर्तवादसत्कार्यवादासत्कार्यवादेभ्यो भिन्न एव कार्यकारणभावो दृष्टिपथं समायाति।

मीमांसायां भाट्टमतप्रवर्तकानां भट्टपादानां कार्यकारणसन्दर्भे औत्पत्तिक-सूत्रव्याख्याने शून्यवादनिराकरणप्रसङ्गेऽभिव्यज्यते कार्यकारणभाव-विषयकोऽभिप्रायः।

कार्यकारणलक्षणोपन्यासः

कार्यकारणयोर्लक्षणं यद्यपि स्वतन्त्ररूपेण इदं कारणस्वरूपम् इदं कार्यरूपमिति नैव प्रादर्शि भट्टपादैस्तथापि शून्यवादिनामभिमतस्य तद्भावभावितस्यैव

कारणत्वस्य निराकरणप्रसङ्गे भट्टपादैः पौर्वापर्यविशिष्टस्य तद्भावभावितस्य कारणत्वं न्यरूपि। अत्रेभिरुच्यते यदत्र तद्भावभावितनियमसहकृतस्य पौर्वापर्यस्यैव वर्तते कारणत्वम्। एवञ्च कार्यकारणभावे कार्यनियतपूर्ववृत्तित्वं कारणत्वं कारणनियतोत्तर वृत्तित्वञ्च कार्यत्वं सङ्गच्छते। यद्यत्र तद्भावभावितात्मकस्य नियमस्य कारणत्वं विहाय पूर्ववृत्तित्त्वस्यैव स्वीक्रियते, पौर्वापर्यत्वं विहाय तद्भावभावितात्मकस्यैव वाङ्गीक्रियते चेदुभयत्र नोपपद्यते कार्यकारणभावः।

उभयोः पक्षयोर्मध्ये तद्भावभावितात्मकं नियमं विहाय पूर्ववृत्तित्वस्यैवोपपाद्यते कारणत्वं पूर्वापरभावमापन्नयोः कार्यकारणभावरहितयोरपि गोरश्वयोः कार्यकारणभावप्रसङ्गः। एवमेव पूर्ववृत्तित्वमात्रस्य कारणत्वाङ्गीकारे घटादिषु रूपोत्पत्तिक्षणसमनन्तरसमुत्पद्यमाने रसे रूपनिरूपितस्य कार्यत्वस्य रूपे च रसनिरूपितस्य कारणत्वस्य च समन्वयादकार्यकारणभावयोरप्येतयोः कार्यकारणभावसमन्वयः स्यादेतदर्थं भट्टपादैः पूर्वभावापन्नेषु पदार्थेष्वपि यस्मात्पदार्थाद्यस्य कार्यस्य निष्पत्तिर्भवति, तस्यैव पूर्ववर्तिनः पदार्थस्य कारणत्वं प्रतिपाद्यते न तु सर्वेषामेव पूर्ववर्तिनाम्। एवञ्च 'तद्भावभावितनियमसहकृतस्यैव पूर्ववर्तिनः कारणत्वमुत्तरवर्तिनश्च कार्यत्वादेतादृशयोरेव भाट्टदृष्ट्या सङ्गच्छते कार्यकारणभावः।[1]

कारणकोटौ शक्तेरपि कारणत्वव्यवस्थापनम्

न्यायवैशेषिकवद् बाह्यपदार्थास्तित्वं प्राभाकरभाट्टोभयपक्षपातिभ्यां मीमांसकाभ्यामङ्गीक्रियते। उत्पत्तेः प्राक्कार्यस्यानवस्थानमपि न्यायवैशेषिक-वदुभयोरपि मतयोः समानरूपेण स्वीकृतन्तथापि कार्यनिरूपितकारणकोटौ शक्तितत्त्वस्याप्यतीन्द्रियास्तित्वं प्रतिपाद्यते।

अनया एव दृष्ट्या मीमांसकानां न्यायवैशेषिकाभ्यां भिद्यते कार्यकारण-भावसिद्धान्तः। पटादीनां कार्याणां समुत्पादकेषु तन्त्वादिषु कारणेषु विद्यतेऽयं शक्तिपदार्थः। अनया शक्त्या सम्पन्नानामेव कारणानां कार्यजनकत्वघटितं कारणत्वमेभिर्निरूप्यते। यद्यपि कदाचित् शक्तिमत्सु कारणेषु विद्यमानेष्वपि कार्यनिष्पत्तिर्नावलोक्यते,तथाप्यत्र 'कादाच्कित्वे' कारणेषु कार्यानुकूलशक्तेर्विद्य-मानत्वेऽपि देशकालप्रभृतिसहकारिकारणानां विरहदशायां शक्तेरनभिव्यक्तेर्हेतुत्वं संसाधयद्भिः सहकारिकारणसहकृतैरभिव्यक्तशक्तिमतामेव पदार्थानां कारणत्वं भट्टपादैर्व्यवस्थाप्यते-

देशकालनिमित्तानि व्यञ्जकान्यर्थवादिनः।
शक्तीनां कारणस्थानां स्वकार्यनियमं प्रति।।[2]

शक्तेर्नित्यत्वमनित्यत्वञ्च

वह्न्यादिषु कारणेषु दाहाद्यनुकूला या शक्तिः प्रतिपाद्यते तस्याः कदाचिच्चन्द्रकान्तमणिसंयोगेन नाशादुत्तेजकसूर्यकान्तमणिसंयोगाच्चन्द्र-कान्तमणेरपसाराच्च पुनः तस्या उत्पत्तेरियं शक्तिरनित्यपदार्थवर्तिनी अनित्या इत्युच्यते मीमांसकैकदेशिभिः। अपरेषां तु सर्वत्र शक्तिमत्वेनैव वह्न्यादीनां कारणत्वमङ्गीकुर्वतां मीमांसकानां मते शक्तिर्यद्यपि नित्या तथापि विशिष्टायां स्थितौ साऽभिव्यक्तिं प्राप्नोति। विपरीतायां स्थितौ शाक्तेरनभिव्यक्तिदशायां स्वरूपतः कारणस्य विद्यमानत्वेऽपि कार्योत्पत्तिर्नैव सङ्गच्छते। अनकूलस्थितौ शक्तेरभिव्यक्तदशायामेव शक्तिमतां कारणानां सद्भावे निष्पद्यन्ते कार्याणि। मीमांसकेषु भट्टपादास्तावन्नित्यशक्तिवादप्रतिपादका इति 'देशकालनिमित्तानि व्यञ्जकान्यर्थ-वादिनः' इत्यत्र 'व्यञ्जकान्यर्थवादिन' इत्यनेन कारिकांशेन स्पष्टं विज्ञायते।

शक्तिबोधकप्रमाणनिरूपणम्

शक्तिमतः पदार्थस्यैव कारणत्वप्रतिपादने समानतायामपि शक्तेरस्तित्वे प्रमाणप्रदर्शनप्रसङ्गे प्राभाकरभाट्टमतयोः वैमत्यं स्पष्टं परिलक्ष्यते। लौकिकवैदिकभेदेन द्विविधत्वाच्छक्तेः तत्प्रमाणस्यापि द्वैविध्यं प्राभाकरैः प्रतिपाद्यते। वह्न्यादिषु लौकिककारणेषु विद्यमाना शक्तिर्दाहादिकार्यानुमेया इति प्राभाकरैर्निरूप्यते।[3] वैदिकस्थलेषु विधिवाक्यबलादेव तत्तत् कर्मजन्यानां स्वर्गादिफलानां जनिकाया अपूर्वात्मिकायाः शक्तेरवगमादस्याः शब्दप्रमाणगम्यत्वं प्राभाकरैः प्रतिपाद्यते।[4]

प्राभाकराणामस्य सिद्धान्तस्य विपरीतमुभयत्र लौकिकवैदिकस्थलेषु विद्यमानेषु कारणेषु शक्तेरस्तित्वं श्रुतार्थापत्त्या एव साध्यते भाट्टैः *"[5] भट्टपादमनुसरद्भिरपि नारायणपण्डितैः लौकिकी या शक्तिर्वर्तते तस्यास्तित्वं भट्टानुरूपमर्थापत्तिगम्यं संसाध्यते, परन्तु वैदिकेषु स्थलेषु यत्र भट्टपादैः श्रुतार्थापत्तेः प्रामाण्यमङ्गीकृतं तत्रैभिः "अन्या तु चोदनैकगम्या"[6] इत्यनया पङ्क्त्या वैदिकशब्दप्रमाणस्य मानत्वं संसाध्य आत्मनो विचारस्वातन्त्र्यमपि प्रकाशितम्।

शक्त्याश्रय-विवेचनम्

अपूर्वात्मिकायाः शक्तेराश्रयत्वविषयेऽपि प्राभाकरभाट्टमतयोर्मध्ये वर्तते वैलक्षण्यम्। प्राभाकरास्तावत्कर्तरि अस्यापूर्वात्मिकायाः शक्तेरुत्पत्तिमस्वीकुर्वन्तः

कर्तुः प्रयत्नजन्येषु कर्मस्वेवास्याः स्थितिं स्वीकुर्वन्ति। भाट्टाभिमते सिद्धान्ते अपूर्वात्मिका शक्तिरियं व्रीह्यादिद्रव्ये, प्रोक्षणादौ कर्मणि, कर्तरि चापि सत्त्वात्, सर्वत्र एव स्वीक्रियते। एतदेवोक्तं वार्तिके-

शक्तिः कार्यानुमेयत्वाद् यद्गतैवोपयुज्यते।
तद्गतैवाभ्युपेतव्या स्वाश्रयान्याश्रयापि वा।।[7]

भट्टपदवीमनुसरद्भिर्नारायणभट्टपादैरपि 'द्रव्यगुणकर्माश्रयाम्'[8] इत्यनेन कारिकांशेन व्याख्यया च द्रव्यगुणकर्माणि त्रिविधानि शक्तेराश्रयत्वेन मानमेयोदये निरूपितानि सन्ति।

कारणकोटौ शक्तेरङ्गीकारस्य प्रयोजनम्

प्रतिपादितस्वरूपायाः शक्तेरङ्गीकारस्य प्रयोजनं निरूपयद्भिर्मीमांसकैरुच्यते यद्द्रव्यगुणकर्मसामान्यशक्त्यभावसञ्ज्ञकेषु षड्विधेषु पदार्थेषु शक्तिपदार्थत्वेनाभिमतस्य अपूर्वस्याभावे कर्मणः त्रिक्षणावस्थायित्वाच्छरीरस्य विनाश्यत्वाच्च शुभाशुभयोः कर्मणोः फलावाप्तिरशक्या। फलावाप्तेरभावात् कर्मणि प्रवृत्तेरशक्यत्वाच्छ्रौतकर्महानिप्रसङ्गः समापतितस्यादस्य निवारणार्थमेव फलोत्पादकस्य करणस्य फलस्य च मध्ये स्वयं कारणयागजन्यत्वे सति कर्मजन्यफलजनकत्वेनोपपाद्यते इयमपूर्वाख्या शक्तिः। उक्तञ्च वार्तिके-

यागादेव फलं तद्धि शक्तिद्वारेण सिद्ध्यति।[9]

एवमेव मूषिकाघ्राणनष्टायाः शक्तेरनङ्गीकारात् स्वरूपतः विद्यमानस्यापि बीजस्याङ्कुरोत्पादनसामर्थ्याभावस्योपपत्तिं न कर्तुं शक्यते। एवमेव मणिसत्त्वे सति दाहाभावस्य मणेरपसारत्वे च दाहजननस्यापि सङ्गतिः, कारणेषु वह्न्यादिषु उत्पन्नविनाशयुक्तायाः आविर्भावतिरोभावयुक्तायाः शक्तेरस्तित्वकल्पनया विना अशक्या एव। एतदर्थं सर्वत्र कारणेषु कार्यजननयोग्यतारूपेयं शक्तिरङ्गीक्रियते मीमांसकैः।

शक्तिभेद निरूपणम्

भाट्टचिन्तामणिग्रन्थे ग्रन्थकृद्भिर्गागाभट्टमहाभागैः शक्तेः सहजा-आधेया-पदशक्तिभेदात्त्रैविध्यं प्रत्यपादि।[13] एतासु त्रिविधासु शक्तिसु यथा वह्न्यादिषु कारणेषु विद्यमाना कार्योत्पादिका सहजा शक्तिरङ्गीक्रियते तथैव 'व्रीहीभिर्यजेत' यवैर्वा इत्यादिवाक्यप्रतिपादितेषु व्रीह्यादिषु यागसाधनेष्वपि यागानुकूला सहजाशक्तिरङ्गीकार्या एव वर्तते।

आधेया शक्तिः

वह्न्यादिषु कारणेषु प्रतिबन्धकमणिसंयोगनष्टाऽपि उत्तेजकसूर्यकान्तमणेः संयोगात्पुनरुत्पद्यमाना ज्वलनरूपकार्यानुकूला सहजा शक्तिरेवाधेया शक्तिरित्युच्यते। एवमेव 'व्रीहीन्प्रोक्षति' इत्यादिषु स्थलेषु विधिवाक्यबलात्प्रोक्षणजन्याऽपूर्वोत्पादिका शक्तिरपि आधेया एव।

पदशक्तिः

घटादिपदेषु तेषामर्थबोधकत्वरूपा वृत्तिः पदशक्तिरित्युच्यते। शक्तिमतः पदस्य शाब्दबोधनिरूपितकारणत्वे नास्ति काऽपि विप्रतिपत्तिः। पदेषु विद्यमाना शक्तिरियं प्राचीनैः नैयायिकैः ईश्वरेच्छात्वेन इच्छात्वेन च नव्यनैयायिकैरङ्गीक्रियते। इच्छायाः गुणपदार्थान्तर्भावान्न पृथक्पदार्थान्तरत्वं शक्तेरुपयान्ति नैयायिकाः। तार्किकानां विपरीतं प्रत्यायकत्वेन शब्दनिष्ठायाः शक्तेः पृथक्पदार्थान्तरत्वमुपपाद्यते मीमांसकैः। एतावदेवात्र न्यायमीमांसाप्रस्थानयोर्वर्तते भेदः।

अभावस्य कारणत्वविमर्शः

न्यायवैशेषिकैः मण्यादीनां प्रतिबन्धकत्वमङ्गीकृत्य मण्यादीनां प्रतिबन्धकाभावस्यापि कारणकोटौ निवेशः क्रियते। प्राभाकराणां मते अभाव अधिकरणस्वरूप एव। एतदर्थमेतेषां नयेऽभावपदार्थ एव नास्ति। पदार्थाभावात्प्रतिबन्धकाभावस्य कारणत्वमपि न सङ्गच्छते। भाट्टमतेऽपि निराकरणमेवोपलभ्यतेऽभावकारणस्य। भट्टपादैः विहितानां कर्मणामननुष्ठानेन यस्य प्रत्यवायस्योत्पत्तिर्भवति तत्र विहितान्यकरणस्य (अभावस्य) कारणत्वं न स्वीक्रियतेऽपितु तस्मिन् समये अन्यत्कर्मानुष्ठानस्यैव प्रत्यवायहेतुत्वमेभिः प्रतिपाद्यते--

विहितं यदकुर्वंस्तु करोत्यन्यदचेतनः।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते।।[11]

इति वार्तिकदिशा विहिते विचारेऽभावस्य कारणत्वं निराकृतं प्रतीयते, तथापि भाट्टमते अभाव-पदार्थस्तु स्वीकृतो वर्तते। अस्योपलब्धयेऽभावात्मकमनुपलब्धिप्रमाणमपि स्वीकृतम्। अभावस्य सर्वथाऽकारणत्वेऽनुपलब्धेरप्यभावत्वादस्याभावग्राहकप्रमाणत्वमप्यनुपपन्नमेव स्यादेतदर्थं वार्तिकव्याख्याकर्तृभिर्भट्ट सोमेश्वरैरपूर्वाधिकरणे-"केवलस्य भावान्तरं विनाऽभावस्य कारणत्वं नेति

वार्तिकार्थः न त्वभावस्य कारणत्वाभाव"[12] इत्यनेन व्याख्यानेनाभावस्य वार्तिकस्थं कारणत्वनिराकरणं साक्षाद्रूपेण कारणत्वनिराकरणपरं संसाध्य परम्परया अन्येन भावपदार्थसहाय्येन सह कारणत्वं स्वीकृतमिति स्पष्टं परिलक्ष्यते।

एवञ्च कारणकोटौ शक्तेरङ्गीकारेण सहाभावस्य साक्षात्कारणत्वनिराकरण-पुरस्सरं परम्परया एव कारणत्वाङ्गीकाराद्विशिष्यते भाट्टाभिमत-कार्यकारणसन्दर्भः।

समवायतादात्म्यसम्बन्धभेदेन कार्यकारणभावभेदः

तार्किकैस्सह प्राभाकराणामप्यभिमतात्कार्यकारणसिद्धान्तादुपादान-कारणकार्ययोः सम्बन्धदृष्ट्याऽपि भिद्यते भाट्टाभिमतः कार्यकारणभावसिद्धान्तः। उपादानकारणेन सह कार्यस्य समवायसम्बन्धो यथा तार्किकैरङ्गीक्रियते तथैवायं प्राभाकराणामप्यभिमतो वर्तते। भाट्टमीमांसकानामत्र वर्तते भिन्ना दृष्टिः। तार्किकप्राभाकराणामभिमतस्य समवायसम्बन्धस्य निराकरणार्थमेभिरुच्यते –'यदपृथग्गतिमत्वमापृथगाश्रयाश्रयिभावरूपेण च इष्यते समवायसम्बन्धः,[13] परन्तु समवायस्य लक्षणमिदमवयवावयविनोरपि न घटते। अवयविनः निष्क्रियत्वेऽपि शाखादिषु अवयवेषु गतेरवलोकनात् अवयविनः गतेरभावादत्रापृथग्गतिमत्वं न सङ्गच्छते। एवमेवावयवेष्वाश्रि- तत्वादवयविनोऽवयवानामपि स्वावयवाश्रितत्वादेतेषामाश्रयाणां पार्थक्यादपृथगाश्रयाश्रयिभावलक्षणमपि समवायस्य नोपपद्यते।

मानमेयोदयकारैर्नारायणपण्डितैरपि समवायस्यास्तित्वं मानाभावे न स्वीक्रियते।[14] भाट्टमतावलम्बिभिर्मीमांसकैः प्रायः विशेषणविशेष्यभावसन्निकर्षस्य सम्बन्धत्वमेव न स्वीक्रियते अत एव अनेन सन्निकर्षेणास्य प्रत्यक्षत्वं भाट्टदृष्ट्या न सङ्गच्छते। एवमेव प्राभाकरैः प्रस्तुतं-"इह गवि गोत्वमिति प्रत्ययोऽधिकरणाधि-कर्तव्यतासम्बन्ध-निबन्धनः, इहेति प्रत्ययत्वाद्, इह घटे तण्डुला इतिवदिदमनुमानमपि" इह भूतले घटो नास्ति इत्यत्र अभावस्याधिकरणात्म-कत्वात्पृथक्तया तस्याभावादपि तस्य सम्बन्धनिबन्धनात्मकस्य साध्यस्याभावेऽपि तादृशःप्रत्ययो वर्तते तद्वत्समवायानुमानेऽपि (समवायाभावेऽपि समवाय प्रत्ययो वर्तते इति) वक्तुं शक्यत्वाद्व्यभिचारित्वान्नानुमानमपि वर्तते अनुमानसाधकम्।[15]

इत्थं समवायं निरस्य भेदाऽभेदात्मकं तादात्म्यमेवात्र सम्बन्धत्वेन संस्थाप्यते भाट्टैः। एवञ्च कार्यकारणभावसन्दर्भे तार्किकभाट्टयोः समवायतादात्म्यसम्बन्ध-भेदघटितोऽपि वर्तते सैद्धान्तिको भेदः।

न्यायवैशेषिकयोर्नययोर्मध्ये प्रपञ्चस्योत्पत्तिमहाप्रलयौ यथाऽभिमतौ तथा भाट्टप्राभाकरप्रस्थानयोर्मध्ये नाभिमतौ। खण्डप्रलयस्यास्तित्वं यद्यपि भाट्टप्राभाकराणामप्यभिमतन्तथाऽपि महाप्रलयस्यास्तित्वनिराकरणाज्जगतः स्थित्युत्पत्तिविनाशत्रैविध्याङ्गीकारादप्येतेषां 'कार्यकारणभावो' न्यायवैशेषिकाभ्याम-भिमतादारम्भवादपरिलक्षितात्कार्यकारणभावात् भिन्न एव परिलक्ष्यते।

सन्दर्भाः

1. औत्पत्तिकसूत्रे शून्यवादे 'तद्भावभावितामात्रं' इत्यतः पृष्ठ सङ्ख्या-401, पर्यन्तम्। मीमांसा श्लोकवार्तिकम्, 398-401
   कामेश्वरसिंह दरभङ्गा संस्कृतविश्वविद्यालयः, दरभङ्गा, 1979
2. देशकालनिमित्तानि, मी०श्लो०वा०, 428
3. सर्वभावानां शक्तिरदृष्टस्वलक्षणापि कार्येणानुमीयते। प्रकरणपञ्चिका पृ०-218
   काशी हिन्दू विश्वविद्यालयः वाराणसी, 1961
4. तस्मान्नियोज्यसमन्धसमर्थ कालान्तरस्थायि कार्यं क्रियातिरिक्तं लिङादिभिरेवोच्यते.... ....प्रकरण-पञ्चिका पृ०-440
5. 'श्रुतार्थापत्तिरेवैका प्रमाणं तस्य वर्तते' तन्त्रवार्तिकम् अजिता द्वितीयो भागः पृ०-43, गङ्गानाथझाकेन्द्रीय-विद्यापीठम्, प्रयागः, 1980। श्रुतार्थापत्तिर्विज्ञेयां शक्तिमाहुः कुमारिलाः।। मानमेयोदयः पृ०-246 चौखम्बा-विद्याभवनं, वाराणसी, 1996
6. अन्या तु चोदनैकगम्या-मा०मे०पृ०-246 पङ्क्तिसङ्ख्या-02
7. शक्तिकार्यानुमेयत्वाद् तन्त्रवार्तिकम् अजिता द्वि०भागः, पृ० 49
8. 'द्रव्यगुणमकर्माश्रयाम्' मान-मेयो० कारिका 41, पृ० 246,
9. यागोदेव फलं तन्त्रवार्तिकम्, अजिता द्वि० भागः पृ० 44.
10. शक्तिस्त्रिधा। सहजाऽऽधेया पदशक्तिश्चेति। भाट्टचिन्तामणि, पृ० 17 चौखम्बा संस्कृत सीरीज आफिस-वाराणसी, सं० 1933.
11. उद्धृतं, मीमांशाकुतूहलम् पृ० 21, सम्पूर्णानन्द संस्कृत वि० वि० वाराणसी 1987.
12. उद्धृतं-मीमांसाकुतूहलम् पृ० 21.
13. द्रष्टव्यं प्रकरणपञ्चिकाया व्याख्यानं, प्रकाणपञ्चिका पृ० 91.
14. विशेषसमवायौ तु शशविषाणसब्रह्मचारिणौ, तत्सिद्धौ प्रमाणाभावः मानमेयोदयः, पृ० 271
15. मानमेयोदयः, पृ० 272-273

3
भाट्टसम्प्रदाये प्रस्थानभेदाः

वेदानां कर्मण्येव तात्पर्यावधारणाय जैमिनिमहर्षिभिः सङ्कलिते मीमांसाशास्त्रे शब्दनित्यत्ववेदाऽपौरुषेयत्वप्रामाण्यादिषु विषयेषु अन्यवादिसिद्धान्तवैभिन्यं यथा वर्तते तथैव नानावादिप्रभाववशादत्रान्तरिकमपि मतवैभिन्यं सुतरां चकासते।

विविधवादिभिः सह विचारभेदेषु धृताकारेऽस्मिन् दर्शने भट्टप्रभाकर-मिश्रवर्येषु ये हि सिद्धान्तभेदा तेषु भृशं पार्थक्यवशादेभिः प्रातिपादितानां सिद्धान्तभेदानां सम्प्रदायभेदेन प्रकाशितं वर्गीकरणं सुधीभिः। भट्टप्रभाकरमिश्रमतैः गुम्फितायां सिद्धान्तमालिकायां यथा विराजन्ते राद्धान्तवैविध्यप्रकाशकानि विविधानि विचारप्रसूनानि तथैव मीमांसायाः प्रथमस्थाने स्थापनीये भाट्टमतेऽपि केषुचिद्विचारबिन्दुषु वैषम्यं दृग्गोचरी भवत्येव।

एकस्मिन्नेव भाट्टप्रघट्टे मीमांसकेषु यथाकथञ्चिदनुभूयमानान् विचारभेद-दृष्टिभेदान्वाङ्गीकृत्य राद्धान्तानामेतेषामान्तरिके वैषम्येऽपि सम्प्रदायस्य मूलभावनया सहाविरोधादेतेषां विचारभेदानां प्रस्थानभेदसञ्ज्ञया विधातुं शक्यते प्रख्यापनम्।

सम्प्रदाय भेदः-मीमांसानये सम्प्रदायभेदेन विद्यमानेषु सिद्धान्तेषु प्राथम्येन विराजन्त इमे विचारबिन्दवः। अध्ययनविधिविध्यर्थनिर्णयकर्मप्रवृत्तिसङ्गतिशाब्द-बोधशब्दप्रामाण्यज्ञानप्रामाण्याभावविषयेषु नितरां परस्परं विप्रतिपद्यन्ते मीमांसासम्प्रदायाः।

अध्ययनविधौ सम्प्रदायभेदः-वेदमात्रस्य धर्मज्ञानप्रतिपादकत्वान्निखि-लाङ्गोपाङ्गसमन्वितस्य चातुर्विध्यमुपगतस्य च निखिलस्य वेदस्याध्ययनस्या-शक्यतया स्ववेदान्तर्गतायाः शाखायाः गुरुमुखोच्चारणानुच्चारणात्मकमध्ययनं प्रतिपाद्यते 'स्वाध्यायोऽध्येतव्य'[1] इत्यनेन विधिना। प्राभाकरभाट्टमतयोरत्र वर्तते विचारभेदः। गुरुमते अध्ययनविधिप्रतिपादितस्याध्ययनस्य अध्ययनविधिसन्निधौ पठितेन 'तमध्यापयीत'[2] इत्यनेनाध्यापनविधिप्रयुक्तत्वं निराकृत्य स्वाध्यायविधिनैव

अध्ययनस्य प्रयुक्तत्वं प्रतिपाद्यते भाट्टैः। एवमेव गुरुमते अध्ययनकरणिकाया भावनायाः साध्यत्वेन स्वाध्यायस्य भाव्यत्वेन वा क्रियते प्रतिपादनम्। एतद्विपरीतं भाट्टनयेऽर्थज्ञानमेवाध्ययनविधेः भाव्यत्वेन स्वीक्रियते।

विध्यर्थनिर्णये सम्प्रदायभेदः-धर्मविचाराय प्रवृत्तेऽस्मिन् मीमांसा-दर्शने विधिवाक्यानामेव साक्षाद्धर्मप्रतिपादकत्वं सूत्रकारप्रणीतेन चोदनासूत्रेणैव प्रतिपादनाद्यद्यपि नास्त्यत्र काऽपि विप्रतिपत्तिस्तथापि केनार्थेन संयुक्तोऽयं विधिः धर्ममाविष्करोतीत्यत्र विध्यर्थनिर्णये प्राभाकरभाट्टप्रस्थानयोर्वर्तते भृशं पार्थक्यम्।

अत्र प्राभाकरैः नियोगापरपर्यायं फलावाप्तिपर्यन्तावस्थितमपूर्वात्मकं तत्तत्क्रियानिष्ठं कार्यताज्ञानमेव लिङर्थत्वेन विध्यर्थत्वेन वा प्रतिपाद्यते[3]। लौकिकवाक्येष्वपूर्वस्याशक्यतया विधायकवाक्यानामगत्या क्रियात्मकत्वमेवानुमन्यते कार्यताज्ञानमेभिः[4]। भट्टपादैस्तावद् '**अभिधा भावनामाहुरित्यनेन** वार्तिकेन पुरुषप्रवृत्त्यनुकूलत्वेन शाब्दीभावनापरपर्यायस्य लिङ्निष्ठस्य शब्दनिष्ठप्रवर्त्तनात्मकस्य च व्यापारविशेषस्य विध्यर्थत्वं निरूप्यते।[5]

कर्मप्रवृत्तिसङ्गतौ सम्प्रदायभेदः- कार्यत्वेन प्रवर्तनात्मकेन वा व्यापारेण विधिप्रतिपादितेषु नित्याग्निहोत्रात्मकेषु नित्यकर्मसु पृथक् इष्ट्यादिनैमित्तिकेषु च अनुष्ठितेषु न फलप्राप्तिरननुष्ठितेषु च प्रत्यवायापत्तिरिति सर्वत्र वेदप्रतिपाद्यत्वेन कर्त्रव्यबुद्ध्या स्वीक्रियते प्रवृत्रिरुभयत्र किं बहुना दर्शपूर्णमासादिष्वपि येषां कृते प्रवर्तन्ते विधयः, तेषां सर्वेषां स्वाधिकारनिरूपितेषु कर्मसु 'मयेदमवश्यं करणीयम्' इति कर्त्तव्यभावनया एवं प्रतिपाद्यते प्रवृत्तिसङ्गतिगुरुमतावलम्बिभिः। अस्मात्सर्वथा वैपरीत्यमुद्वहद्भिर्भाट्टैर्यथा काम्यकर्मसु फलभावनया एव प्रतिपाद्यते प्रवृत्तिसङ्गतिः।[6]

शब्दप्रामाण्यशाब्दबोधप्रक्रियासु सम्प्रदायभेदः- यत्र प्राभाकरैः प्रमादाप्रामाण्याज्ञानादीनां पुरुषनिष्ठदोषाणां लौकिकवाक्येषु सम्भावनया प्रापाण्यं निराकृत्य वैदिकवाक्यात्मकानां शब्दानामेव स्वीक्रियते प्रामाण्यं, तत्र भाट्टमते लौकिकवैदिकयोरुभयोरपि शब्दयोः प्रामाण्यमभिमतं दृश्यते। शब्दप्रामाण्यवत् शाब्दबोधप्रक्रियायामपि विप्रतिपद्यन्ते परस्परं भाट्टप्राभाकराः।

प्राभाकरैस्तावत्घटमानयेत्यादिषु वाक्येषु घटानयनादिपदार्थेषु पृथक्तया शक्तिं निराकृत्य आनयनादिक्रियासमन्वितस्य घटादीनां परिज्ञानस्याङ्गीकारात्समन्वितानामेव पदार्थानां वाक्यार्थत्वमङ्गीक्रियते। अयमेव प्राभाकराणां प्रथितचरोऽन्विताभिधानवादसाकः सिद्धान्तः। सिद्धान्तेऽस्मिन् वेदस्थलेषु

नियोगापरपर्यायेणापूर्वेण सह समन्वितानां पदार्थानां वाक्यार्थत्वं प्रतिपाद्यते। लौकिकस्थलेषु अपूर्वस्याभावादगत्या क्रियान्वितानामेव पदार्थानामङ्गीक्रियते वाक्यार्थत्वम्।

भट्टपादैस्तु '**विशेष्यं नाभिधागच्छेत् क्षीणशक्तिर्विशेषणे**'[7] इत्यस्य वार्तिकस्यानुरोधात् पदानां पदार्थाभिधेयत्वमेवाङ्गीकृत्याभिहितानां पदार्थानाञ्चाकाङ्क्षायोग्यतासन्निधिबलाल्लक्षणया एवाङ्गीक्रियते वाक्यार्थप्रतीतिः। एवमेव ज्ञानप्रामाण्याभावादिष्वपि भाट्टप्राभाकरयोरुपलभ्यते विचारभेदः। पत्रस्यास्य भाट्टप्रस्थानपरिसीमिततयात्र विस्तरभयादेतेषामुल्लेखमात्रेणैवालं मन्ये।

भाट्टमते प्रस्थानभेदाः-भाट्टमीमांसायां समानेऽपि सम्प्रदाये महत्त्वपूर्णानां वेदार्थसमन्वयकसिद्धान्तानां प्रतिपादनप्रक्रियायां परस्परभेदमुद्वहन्तः प्रकाशन्ते नैके प्रस्थानभेदाः। एतेषु मण्डनमिश्रपार्थसारथिमिश्रगागाभट्टप्रभृतीनां मीमांसकानां-विविधविचारप्रसङ्गेषु विचारस्वातन्त्र्यमूलकानि विराजन्ते नूतनप्रस्थानानि। अत्र वर्णनीयेषु विषयेषु अध्ययनविधिविध्यर्थप्रामाण्यवादविषयाः नितरां प्रामुख्यं भजन्ते।

अध्ययनविधेरर्थनिर्णये प्रस्थानभेदाः-भाट्टकुलावतंसैर्विश्वेश्वरभट्टापरनामधेयैर्गागाभट्टैस्तावत्स्वाध्यायोऽध्येतव्य' इति वाक्यबोधिताया भावनाया भाव्यस्य फलस्य वा निरूपणावसरे स्वाभिमतप्रकाशनात्प्राक् प्रदर्शिताः प्रस्थानभेदविभूषितास्त्रयः पक्षाः।

1. अत्र कैश्चिद् भाट्टप्रघट्टान्तर्भूतैरपि सर्वजनाभिलषणीयतया स्वर्गस्यैव 'स्वाध्यायोऽध्येतव्य' इति वाक्यनिरूपितः भावनाभाव्यत्वं प्रतिपाद्यते।[8]
2. अन्यैरेकदेशीयैरत्राक्षरग्रहणस्यैवाध्ययनभावना भाव्यत्वं निरूप्यते।
3. तृतीयः पक्षस्तावद् गागाभट्टैः स्वपितृचरणानां दिनकरभट्टानां प्रदर्शितः। एतेषां मते 'स्वाध्यायोऽध्येतव्य' इत्यत्र अध्येतव्य इति पदं तव्यप्रत्ययान्तम्। अत्र कर्मणि तव्यप्रत्ययस्य वर्तते विधानमेतदर्थमनेन कर्मबोधकेन फलबोधकेन वा तव्यप्रत्ययान्तेन अध्येतव्यपदेन सहैव स्वाध्यायस्य विधानादेकवाक्यतया स्वाध्यायस्यैव अध्ययनभावनाभाव्यत्वेमेभिः प्रतिपादितम्।'

अस्मिन् मतत्रये द्वयोर्मतयोः कण्ठतः निराकरणमुपलभ्यते भाट्टचिन्तामणौ। प्रथमपक्षस्य स्वर्गफलस्यादृष्टत्वादस्यासमीचीनत्वमत्र प्रकाशितम्।[10]

द्वितीयेऽक्षरग्रहणस्य भाव्यत्वाङ्गीकारे पक्षे यद्यप्यदृष्टार्थकत्वं नास्ति तथाप्यक्षरग्रहणस्यापुरुषार्थकत्वादस्य वर्तते वैय्यर्थम्।[11] स्वाध्यायस्य भाव्यात्मकत्वे तृतीये पक्षेऽर्थज्ञानस्य स्वाध्यायजन्यत्वात्पुरुषार्थकत्वेन सह दृष्टार्थकत्वमप्यत्र सुस्थिरं, तथाप्यस्मिन्पक्षे पुरुषार्थरूपस्यार्थज्ञानस्योपसर्जनतयोपस्थितेरत्रास्वारस्यम् 'इत्याहुः' पदेन प्रकाश्य विधेरर्थज्ञानमेव भाव्यत्वेन विशदीकृतं गागाभट्टवर्यैः। स्वाध्यायविधिनिरूपितभाव्यत्वे विचारभेदेऽपि स्वाध्यायविधेर्गरीयस्त्वं सर्वेषामभिमतमिति मन्ये सम्प्रदायाभिन्नत्वमेतेषाम्।

विध्यर्थनिर्णये प्रस्थानवैभिन्यम्- चोदनालक्षणोऽर्थो धर्म[12] इत्यस्माज्जैमिनिसूत्राद्धर्मस्य साक्षाद्रूपेण वैधिमात्रगम्यत्वे यद्यपि नास्ति वैमत्यं मीमांसकानां, तथापि विधिरयं केनार्थेन विभूषितः कर्मप्रवृत्तिप्रवर्तनात्मकत्वमात्मनः प्रकटीकरोतीत्यत्र विप्रतिपद्यन्ते भाट्टसम्प्रदायानुयायिनो मीमांसकाः।

विध्यर्थे कौमारिलं मतम् :- भाट्टसम्प्रदायप्रवर्तकैः कुमारिलैस्तावद् '**अभिधाभावनामाहुरित्यनेन** वार्तिकांशेन' 'भावना' विध्यर्थत्वेन प्रकाशिता। विवरणमपि स्वयमेवास्य वार्तिकांशस्य प्रकाशितं-'तत्रार्थात्मिकायां भावनायां लिङादि-शब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्मोऽभिधात्मिका भावना विधिरित्युच्यते।[13] अनेन विवरणेन ज्ञायते यद् पुरुषप्रयोजकव्यापार-धर्मात्मिका भावना एव कुमारिलाभिमतो विध्यर्थः।

विध्यर्थे राणकमतम् :- तन्त्रवार्तिकव्याख्याकारैः राणक इत्युपाधिना प्रसिद्धिमवाप्नुवद्भिर्भट्टसोमेश्वरैरत्र प्रवर्तनासामान्यमेव विध्यर्थत्वेनाङ्गीक्रियते। 'अपौरुषेयेवेदे' शब्दनिष्ठो यः प्रेरणापरपर्यायः शब्दव्यापारः स एव शाब्दीभावनात्मकः प्रवर्तनात्वेन रूपेणैभिः प्रकाश्यते विध्यर्थः। इष्टसाधनत्वस्य विध्यर्थत्वनिराकरणाय इमे वदन्ति यद् इष्टसाधनत्वस्य विध्यर्थत्वे 'इष्टसाधनमिति' शब्दस्य विधिशब्दः पर्यायः स्यात्। न च पर्यायत्वं युज्यते। '**सन्ध्योपासनं ते इष्टसाधनं तस्मात्तत् त्वं कुरू**' इति पर्यायाणां सहप्रयोगाशक्यत्वात् समीचीनमप्येतद्वाक्यमसमीचीनतायां कौटो प्रक्षिप्तं स्यादेतदर्थं प्रेरणापरपर्यायस्य शब्दव्यापारस्यैव विध्यर्थत्वान्नेष्टसाधनत्वं विध्यर्थः।[14]

पार्थसारथिमिश्रमते विध्यर्थस्वरूपम् :- इष्टसाधनत्वविरहितस्य प्रवर्तनात्मकस्यालौकिकशब्दव्यापारस्य विध्यर्थत्वं न रोचते पार्थसारथिमिश्रेभ्यः। यद्यपि प्रवर्तनायाः विध्यर्थत्वाङ्गीकारे वर्तते एतेषामपि सम्मतिस्तथापीष्टसाधनता

विरहितायाः प्रवर्तनायाः विध्यर्थत्वमेतेषां नाभिमतम्। एभिस्तावदिष्टसाधनत्वस्यैव प्रवर्तनात्वेन रूपेण विध्यर्थत्वमङ्गीक्रियते। सन्ध्योपासनं त इष्टसाधनं तस्मात्तत्त्वं कुरू इत्यत्रोक्तशङ्कायाः समाधानार्थमेभिरुच्यते यत् सामान्यविशेषधर्माविच्छिन्नत्र्योः पदयोः सहप्रयोगे नास्ति काप्यापत्तिः। 'पाञ्चालराजो द्रुपद'इत्यत्र यथा पाञ्चालराज इति सामान्यस्य 'द्रुपद' इति विशेषस्य च सहप्रयोगे नास्ति कापि विप्रतिपत्तिस्तथैवात्रापि इष्टसाधनत्वस्य विशेषतया प्रवर्तनायाश्च सामान्यतया प्रतिपादनादेतयोः नास्ति कापि विप्रतिपत्तिः। सर्वत्र व्यक्तेः स्वतः प्रवृत्तौ परतः प्रवृत्तौ वा इष्टसाधनत्वस्यैवानुसन्धानात् प्रवर्त्तनात्वेनेष्टसाधनत्वमेव वर्तते विध्यर्थः।[15]

मण्डनमिश्राभिमतं विध्यर्थस्वरूपम्-मीमांसादर्शनस्य भाट्टमतावलम्बनं कुर्वद्भिरपि मण्डनमिश्रवर्यैः बहुषु स्थलेषु विचारस्वातन्त्र्यं प्रकाशितम्। विध्यर्थविचारस्थले इष्टसाधनत्वमेव विध्यर्थत्वेनैभिः प्रस्थापितम्। तार्किकैस्तावदिष्टसाधनत्वकृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वेषु त्रितयेषु लिङ्निरूपितां शक्तिमङ्गीकृत्य त्रयाणामेव लिङर्थत्वं विध्यर्थत्वं वा प्रतिपाद्यते। मण्डनमिश्रैस्तावदत्रेष्टसाधनत्वातिरिक्तयोः कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वयोः विध्यर्थत्वस्य निराकरणार्थं प्रस्तूयेते द्वाविमौ तर्कौ

1. यागादेः कृतिसाध्यताज्ञानं लोकव्यवहारेणैव सिद्धम्। कृतिसाध्यतारहितेषु कर्मसु विदुषां प्रवृत्तेरदर्शनाद्दर्शनाच्च कृतिसाध्येष्वेव कर्मसु, शब्दार्थस्य चानन्यलभ्यत्वनियमाद् व्यवहारसिद्धस्य कृति-साध्यताज्ञानस्य न स्याद्विध्यर्थत्वम्।
2. एवमेव बलवदनिष्टाननुबन्धित्वज्ञानस्य द्वेषापरपर्यायस्यानिष्टस्या-भावज्ञानजनकत्वात्प्रवृत्तावन्यथासिद्धत्वाच्च विध्यर्थत्वेनाङ्गीकर्तुम-शक्यत्वादिष्टसाधनत्वमेव विध्यर्थः।[16]

यागदानक्रियासु इष्टाभ्युपायत्वादन्यः प्रवर्तको नास्ति। प्रवृत्तिहेतुभूतो यो धर्मः स एव प्रर्वत्तना इति जना वदन्ति। इत्यर्थप्रतिपादकेन 'पुंसां नेष्टाभ्युपायादि'[17] पद्येनेष्टसाधनत्वस्यैव प्रवर्तनात्वमेतेषामभिमतम्।

पार्थसारथिमिश्रमते प्रवर्तनात्वेनेष्टसाधनत्वमिष्टमित्यत्रोभयोः प्रवर्तनात्वेष्टसाधनत्वयोः पृथक्तया जायते भानम्। मण्डनमिश्रमते इष्टसाधनत्वस्यैव प्रवर्तनात्वाङ्गीकारादपृथक्तयोभयोरत्र तादात्म्यं प्रतीयते। अयमेव वर्तते मतयोरुभयोरांशिको भेद इति।

विश्वेश्वरभट्टानां समन्वयात्मिका दृष्टिः– तत्त्वचिन्तनप्रसङ्गे भाट्टमतैस्सह तार्किकाणां यादृशो विरोधस्तादृशः प्राभाकरैस्सह नैव प्रतीयते। 'समवायस्य' पृथक्तया पदार्थत्वे, द्रव्याणां नवसङ्ख्यापरिमितत्वे शब्दस्य च गुणत्वे प्राभाकर-नैयायिकयोः सदृशी एव प्रकाशते विचारसरणिः परन्तु भाट्टनैयायिकयोर्नास्त्यत्र विचारसाम्यम्। येष्वपि स्थलेषु 'अयुतसिद्धसम्बन्धत्वेन नैयायिकैः समवायसम्बन्धः प्रदर्शितः तत्र भेदसहिष्णुतया तादात्म्यसम्बन्धः प्रतिपाद्यते भाट्टैः[18]। समवायस्य पृथक्पदार्थत्वं नैयायिकैः स्थापितम्। भाट्टैरत्र द्रव्यगुणयोः तादात्म्यसम्बन्धे द्रव्ये द्रव्यरूपेण तादात्म्यस्य सत्त्वात् गुणे गुणरूपेण चान्तर्भावादस्य मन्ये पृथक्पदार्थत्वं तादात्म्यस्य भाट्टैर्नैव प्रतिपादितम्। द्रव्याणामपि नवसङ्ख्यापरिमितत्वे भिद्यते नैयायिकेभ्यो भाट्टदृष्टिः। शब्दतमसोरपि द्रव्यत्वाङ्गीकाराद्देकादशधाऽभिमतं द्रव्यत्वं भाट्टसरण्याम्[19]। शब्दसन्दर्भेऽपि न्यायप्रभाकरमतानुरूपं शब्दस्य गुणत्वं निरस्य शब्दस्य द्रव्यत्वमेव स्थापितं भाट्टैः।[20]

तत्त्वमीमांसायां विचारितेषु स्थलेषु यादृशो वर्तते भाट्टनैयायिकयोर्विचारभेदः, ज्ञानप्रामाण्यस्थलेऽपि तादृश एवोपलभ्यते। भाट्टैस्तावद् सर्वेषामेव ज्ञानानां स्वतः प्रामाण्यमङ्गीक्रियते[21]। नैयायिकैस्तु परत एव स्वीक्रियते ज्ञानानां प्रामाण्यम्।[22]

भाट्टचिन्तामणिकाराः विश्वेश्वरभट्टवर्याः यद्यपि भाट्टपरम्पराभिमानिनस्तथापि बहुषु स्थलेषु एतेषां विचारदृष्टिः न्यायदर्शनप्रभावभाविता परिलक्ष्यते। भाट्टमीमांसाप्रतिपाद्यविषयाणां न्यायप्रतिपादितैर्विषयैः सह समन्वयार्थमिमे बद्धपरिकरा इति स्पष्टं प्रतीयते। न केवलं प्रतिपाद्यविषयाणां प्रकाशनार्थमेभिः न्यायपरम्पराप्रसिद्धया नव्यन्यायशैलीसमन्वितया भाषयोपनिबद्धं भाट्टचिन्तामणि-ग्रन्थरत्नमपितु प्रतिपाद्येष्वपि यत्रापि शक्यं तत्रात्मनः प्रकाशिता समन्वयात्मिका दृष्टिः।

1. सन्निकर्षस्थेलषु यथा नैयायिकैः संयुक्तसमवायसंयुक्तसमवेत समवाययोः प्रतिपादनं कृतं तादृशम् एभिरपि स्वग्रन्थे प्रकाशितम्।[23]
2. नैयायिकैर्यथा समवायस्य पदार्थान्तरत्वमङ्गीकृतं तथैव एभिरपि पदार्थगणनायां समवायस्योल्लेखात् स्वीकृतं प्रतीयते।[24]
3. अलौकिकसन्निकर्षस्थले भाट्टेषु योगजसन्निकर्षस्य निराकरणात् सामान्यलक्षणाज्ञानलक्षणयोरनुल्लेखाच्चालौकिकसन्निकर्षाणामस्तित्वमेवात्र नाभिमतमिति प्रतीयते। यद्यपि योगजसन्निकर्षस्य गागाभट्टैरपि निराकरणं

कृतं वर्तते,[25] तथापि सामान्यलक्षणा[26]ज्ञानलक्षणाङ्गीकारे[27] नैयायिकैः सहैतेषां प्रतीयते विचारसाम्यम्।

एतेषु स्थेलषु भाट्टचिन्तामणिकारैर्यद्यपि न्यायपक्षपातित्वं प्रकटीकृतं तथाप्यात्मनो भाट्टानुयायित्वमपि रक्षितम्। भाट्टानां विचार्यमाणेषु विषयेषु मौलिकभूतं यद्वेदापौरुषेयं, तत्र न्यायमतं निरस्य भाट्टमतमेव स्थापितम्।

भाट्टपरम्परायां विचारितेष्वन्येष्वपि शब्दनित्यत्वशब्दद्रव्यत्वादिषु स्थलेषु भाट्टसम्प्रदायानुरूपमेव स्वाभिमतं स्थापितम्।

सन्निकर्षस्थले यद्यपि तादात्म्यस्य स्थाने समवायस्योल्लेखात् तार्किकमतमुररीकृतं तथापि न्यायाभिमतमयुतसिद्धसम्बन्धः समवाय इति लक्षणं निरस्य भाट्टैर्यत्तादात्म्यस्य भेदसहिष्णुसम्बन्धो भेदाऽभेदसम्बन्धोवेति लक्षणमङ्गीक्रियते, तदेवात्र समवायस्य लक्षणत्वेन स्थापितम्[28]। शब्दस्तावन्नैयायिकानामर्थस्तु मीमांसाकानामेव प्रतिपादनादत्रापि प्रदर्शिता समन्वयात्मिका दष्टिः।

स्वतःप्रामाण्यवादस्य सिद्धान्तोऽपि भाट्टैर्वेदाऽपौरुषेयत्वस्य रक्षणार्थमेवाङ्गीकृत इत्यनया प्रतिपत्त्या वेदज्ञानस्य प्रामाण्यमङ्गीकृत्य परम्परा रक्षिताऽन्येषां ज्ञानानां परतःप्रामाण्याङ्गीकारान्न्यायमतमपि सम्मानितम्[29]। भाट्टपरम्परायामपि संस्थापितां न्यायभाट्टसिद्धान्तसमन्वयप्रस्थानम्।

यद्यप्युभयत्र न्यायदर्शने भाट्टमीमांसायाञ्च समन्वयस्य महत्तरं कार्यमेभिस्साधितं तथाप्यस्यां दिशायां प्रवृत्तानामेतेषां सिद्धान्तप्रतिपादनेषु क्वचित् स्खलितमपि स्पष्टं प्रतीयते :-(1) सन्निकर्षस्थले तादत्म्यस्वरूपेणाङ्गीकृतस्य समवायस्य पदार्थगणनायां पृथक्तया ग्रहणं सर्वथानावश्यकमत एवात्र कल्पनागौरवदूषणं स्पष्टमेव। (2) एवमेव प्रामाण्यवादे वेदानां स्वतःप्रामाण्यमन्येषां ज्ञानानां परतः प्रामाण्यवादस्थापनयापि ज्ञानमात्रस्य यत्स्वाभाविकं प्रामाण्यं कुमारिलभट्टपार्थसारथ्यादिभिः स्थापितं तद्विच्छिद्यते। वेदमात्रस्य स्वतः प्रामाण्याङ्गीकारेण वेदत्वेनैव ज्ञानस्य प्रामाण्याङ्गीकाराद् ज्ञानप्रामाण्यस्य स्वतस्त्वमेव विलुप्तं प्रतीयते। (3) सामान्यलक्षणाङ्गीकारप्रसङ्गे एकस्मिन् व्यक्तौ गृहीतायामपि शक्तौ तदतिरिक्तेषु शक्तिग्रहार्थमप्यस्याः प्रत्यासत्तेरनिवार्यत्वं प्रतिपादयद्भिरेभिः प्रातिपदिकार्थनिरूपणप्रसङ्गे स्वप्रतिपादितः जातिशक्तिवादसिद्धान्तो विस्मृत इति प्रतीयते।

सत्स्वप्येतेषु दोषेषु-'न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते। इति

वार्तिकप्रकाशितायां दिशि विहिते मूल्याङ्कने भट्टवर्याणां विश्वेश्वरभट्टानां समन्वयप्रस्थानं नूनं। भाट्टपरम्परायां नूतनमवदानमित्यपि सुवचमेव।

निष्कर्ष-मीमांसादर्शनस्य भाट्टप्राभाकरमिश्रमतभिन्नेषु विविधेषु सम्प्रदायेषु भाट्टसम्प्रदायेऽपि विचारभिन्नतया प्रकाशितेषु प्रस्थानभेदेषु वा सर्वत्राम्नायस्य क्रियार्थत्वप्रतिपादनघटितमभिन्नत्वं, वेदप्रतिपादितस्य कर्मणः सङ्गतये एव सर्वेषां युक्तिनैपुण्यप्रकर्षस्य च प्रकाशनात् समेषां मीमांसकानां युक्तिप्रदर्शनभेदेऽपि लक्ष्यस्याभिन्नत्वमेव विराजते।

सन्दर्भ

1. श० ब्रा० 11.5.7.2, तैत्तरीयं आरण्यकं 2/15
2. द्रष्टव्या विशेष-टिप्पणी, प्रकरणपञ्चिका पृ०-25 का०हि०वि०वि० 1961
3. कार्यमेव हि सर्वत्र प्रवृत्तावेककारणम्। प्रवृत्त्यव्यभिचारित्वाल्लिङाद्यर्थोऽवधार्यते।। स एव पृ०-34
4. लिङादियुक्तलौकिकवाक्यस्य च लक्षणयाऽऽनयनादिरूपकार्यान्वितबोधकत्वम्। भाट्टचिन्तामणि पृ०-62 चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, 1933
5. "अभिधाभावनामाहुः" तन्त्रवार्तिकम् अजिता, पृ०-18 गङ्गानाथ झा केन्द्रीय विद्यापीठम्, प्रयागः, 1980
6. मीमांसापरिभाषा, पृ०-103 कृष्णदास-अकादमी, वाराणसी, 1987
7. मीमांसान्यायप्रकाश पृ०-79 श्रीलाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठम्, नव दिल्ली, 7, 1983
8. स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात् जैमिनिसूत्रं 4.3.15
9. 'कर्मार्थकतव्यप्रत्ययस्तु सम्बन्धमात्रे लाक्षणिकः भाट्टचिन्तामणि पृ०-20
10. स्वर्गार्थत्वमिति चेन्न अदृष्टार्थत्वापत्तेः' वही० पृ०-2
11. 'नाप्यक्षरग्रहणम्। पुरुषार्थाननुबन्धित्वात्' भा०चि०पृ०-2
12. जैमिनिसूत्रम् 1.1.2
13. अजिता (तन्त्रवार्तिकम्) द्वितीयोभाग० पृ०-18 गङ्गानाथझा के०सं०वि० प्रयागः, 1990
14. यत्तु इष्टसाधनत्वं विध्यर्थ इति, तन्न। तथा सति इष्टसाधनमिति शब्दस्य विधिशब्दः पर्यायः स्यात्। न च पर्यायत्वं युज्यते। मीमांसान्यायप्रकाशः पृ०-286
15. मीमांसान्यायप्रकाश पृ०-294
16. भाट्टचिन्तामणि पृ०-88 पङ्क्ति 19 से 21
17. पुंसं नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः। प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तना।। विधिविवेक, मी०न्या० प्रकाशे पृ०-295

18. 'भेदाभेदसहमन्योन्याभावविरोधी तादात्म्यम्।' विवरणप्रमेयसङ्ग्रहः पृ०-44 अच्युत ग्रन्थ मालाकार्यलयः वाराणसी, 1975
19. तन्त्रसिद्धान्तरत्नावली पृ०-170, काशीहिन्दू विश्व विद्यालयः, वाराणसी, 1944
20. 'तत्रापि कर्मवत्वेन द्रव्यत्वानुमानम्।' भाट्टचिन्तामणि, पृ०-16 पङ्क्ति-19
21. 'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्। न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते।। श्लोकवार्त्तिकम् सं०-47
22. अथैवमप्यप्रामाण्यं परतस्तर्हि प्रामाण्यमपि परत एव गृह्यताम्।' तर्कभाषा पृ०-244, चौखम्बासुरभारती प्रकाशनम्, 1990
23. सन्निकर्षश्च संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायश्चेति।' भाट्टचिन्तामणिः पृ०-16
24. 'एवञ्च द्रव्यगुणकर्मसामान्यसमवायशक्त्यभावाः सप्तपदार्थाः।' भाट्टचिन्तामणिः पृ०-17 पं० 28
25. तद्योगिषु मानाभावेनासुन्दरम्। न चेतिहासपुराणादिमानम्। तस्यान्यतात्पर्यकत्वदिति दिक्। भाट्टचिन्तामणि पृ०-23
26. भाट्टचिन्तामणि पृ०-23
27. भाट्टचिन्तामणिः पृ०-23 पं० 08
28. 'न त्वयुतसिद्धसम्बन्धः सः। युतसिद्धेर्वक्तुमशक्यत्वात्।' भाट्टचिन्तामणिः पृ०-18
29. भाट्टचिन्तामणि, पृ०-15 पं० 02-08
30. श्लोकवार्त्तिकम् वार्त्तिक 07 पृ०-04 ताराप्रकाशनं, वाराणसी, 1978

4
भाट्टनये प्रामाण्यवादः

भारतीयदर्शनेषु स्वप्रमेयसिद्ध्यर्थं प्रमाणानां सर्वैरपि प्राथम्यमङ्गीकृतम्। दर्शनसम्प्रदायेषु न केवलं प्रमाणानां सङ्ख्यास्वरूपविषये पार्थक्यमुपलभ्यतेऽपितु प्रमाणजन्यं याथार्थ्यलक्षणं प्रमात्वात्मकं यत्प्रामाण्यं वर्तते ज्ञानस्य, तस्य प्रामाण्यस्य, तस्य स्वतस्त्वपरतस्त्वनिर्णयेऽपि एतेषु सम्प्रदायेषु पर्याप्तं वैभिन्यं बुद्धिपथं समायाति।

ज्ञानस्य प्रामाण्यमप्रामाण्यं वा, उभयत्र, स्वतस्त्वमेवाङ्गीक्रियते साङ्ख्यैः।[1] न्यायनये वैशेषिकमते च उभयत्र परतस्त्वं स्वीक्रियते।[2] बौद्धानामेकदेशिनां मते अप्रामाण्यस्य स्वतस्त्वं प्रामाण्यस्य च परतस्त्वमभिमतम्।[3] एभिः सिद्धान्तैर्वैरीत्यमुद्वहतां भाट्टमीमांसकानां विचारसरणौ प्रामाण्यमेव स्वतो निश्चीयते। अप्रामाण्यस्य निश्चयस्तावदेभिरपि नैयायिकानां रीत्या प्रवृत्तिवैफल्यादिभिर्हेतुभिः परत एव उररीक्रियते।

प्रामाण्यस्य द्वैविध्यं स्वतस्त्वं परतस्त्वञ्च

उत्पत्तिज्ञप्तिगतभेदेन ज्ञानस्य प्रामाण्यमप्रामाण्यञ्च द्विविधम्। उत्पत्तिगते ज्ञप्तिगते च उभयत्र प्रामाण्याप्रामाण्यस्य परतस्त्वमेव संस्थापितं तार्किकैः। भाट्टविचारवीथिकायामुत्पत्तिगतस्य ज्ञप्तिगतस्य च ज्ञानस्य प्रामाण्यमेव स्वतस्त्वेनाङ्गीकृतम्। अप्रामाण्यं तावत् द्विविधेऽपि स्थले परतस्त्वेनैवानुमोदितम्।

प्रथमं तावत् किं नाम स्वतस्त्वं? किञ्च परतस्त्वमेतद्विचारणीयम्। यया कारणसामग्र्या ज्ञानमुत्पद्यते तयैव सामग्र्या प्रामाण्यस्याप्युत्पत्तौ प्रामाण्यस्योत्पत्तिगतं स्वतस्त्वमुच्यते। सङ्क्षेपधिया एतदेव ज्ञानोत्पादिकातिरिक्तान्यपेक्षत्वं नाम प्रामाण्यस्योत्पत्तिगतं स्वतस्त्वमिति वक्तुं शक्यते। भेदेतु ज्ञानोत्पादिकायाः कारणसामग्रयाःप्रामाण्योत्पादिकया सामग्रया ज्ञानोत्पादिकातिरिक्तापेक्षत्वात्मकं परतस्त्वमुत्पत्तिगतस्य प्रामाण्यस्याङ्गीक्रियते विबुधैः।

प्रामाण्यस्योत्पत्तौ स्वतस्त्वपरतस्त्वे

तार्किकनये ज्ञानस्योत्पत्ताविन्द्रियाणां कारणत्वमङ्गीकृतम्। ज्ञानप्रामाण्य-

स्योत्पत्तौ इन्द्रियगतगुणानां कारणत्वाङ्गीकारात्[4] ज्ञानोत्पादिकया कारणसामग्र्या प्रामाण्योत्पादिकायाः कारणसामग्र्याः पार्थक्यात् परतस्त्वमुत्पत्तिगतस्य प्रामाण्यस्याभिमतं मतम्।

उत्पत्तिगतस्य ज्ञानप्रामाण्यस्य परतस्त्वं निराकुर्वतां मीमांसकानां सिद्धान्ते इन्द्रियगतगुणजन्यत्वात्मके प्रामाण्ये गुणत्वं नाम दोषाभावात्मकत्वमेव वर्तते, अत एव येन दोषाभावात्मकत्वेन गुणवत्वेनेन्द्रियेण ज्ञानं जन्यते तेनैव तस्य ज्ञानस्य प्रामाण्यस्योत्पत्तेरप्यङ्गीकारात् ज्ञानोत्पादिकायाः सामग्र्याः प्रामाण्योत्पादिकया सामग्र्या सहाभेदत्वात्सिद्ध्यते स्वतस्त्वमुत्पत्तिगतस्य ज्ञानप्रामाण्यस्य।

यदा कदाचिदवधृते ज्ञाने प्रवृत्त्यादिभिर्हेतुभिः अप्रामाण्यमुपलभ्यते तर्हि एतस्याप्रामाण्यस्येन्द्रियगतकाचकामलादि-दोषजन्यत्वादुत्पत्तिगतस्याप्रामाण्यस्य नैयायिकदिशानुरूपं परतस्त्वमनुमन्यते भाट्टैरपि।

प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वपरतस्त्वे

ज्ञानप्रामाण्यस्य ज्ञप्तिगते प्रामाण्येऽपि नैयायिकभाट्टमीमांसकयोः महत् पार्थक्यमुपलभ्यते। ज्ञप्तिगतस्य प्रामाण्यस्य स्वतस्त्वं नाम ज्ञानग्राहकातिरिक्तान-पेक्षत्वम्। ज्ञानोत्पादिकया सामग्र्या एव प्रामाण्यस्यापि ग्रहणं प्रामाण्यस्य ज्ञप्तिगतं स्वतस्त्वमुच्यते। एतद्विपरीतं यदि ज्ञानोत्पादिका सामग्री काप्यन्या प्रामाण्योत्पादिका च तदितरा चेदेतदेव ज्ञप्तिगतस्य प्रामाण्यस्य परतस्त्वं मन्यते।

ज्ञप्तौ प्रामाण्यस्य परतस्त्वम्

नैयायिकास्तावत् ज्ञप्तिगतेऽपि प्रामाण्ये परतस्त्वमेवानुमन्यन्ते। एतेषां मते प्रथमं तावत् 'अयं घट' इत्याकरकं व्यवसायात्मकं ज्ञानं जन्यते। एतदनन्तरं घटमहं जानामि घटज्ञानवानहमिति वाऽनुव्यवसायो जन्यते अनुव्यवसायात्मकेन ज्ञानेन प्रथमं व्यवसायात्मकं ज्ञानं गृह्यते। गृहीते ज्ञाने विषयस्य ग्रहणादौ जातायां सफलीभूतायां प्रवृत्तौ 'इदं मे जलज्ञानं प्रमाणं, सफलप्रवृत्तिजनकत्वात्' इत्यनेन प्रवृत्तिसाफल्यमूलकेनानुमानेन गृहीतस्य ज्ञानस्य प्रामाण्यं निश्चीयते।[5]

विफलीभूतायां प्रवृत्तौ 'अप्रमाणं मे इदं जलज्ञानम्' असमर्थप्रवृत्तिजन-कत्वादित्यादिकेन प्रवृत्तिवैफल्यमूलकेनानुमानेन गृहीतस्य ज्ञानस्याप्रामाण्यञ्च गृह्यते।

एवं न्यायनये ज्ञानग्राहिकायाः अनुव्यवसायात्मिकायाः सामग्र्याः प्रामाण्याप्रामाण्यग्राहिकया प्रवृत्तिसाफल्यवैफल्यमूलकानुमानात्मिकया सामग्र्या सह भेदात् ज्ञानग्राहकातिरिक्तापेक्षत्वरूपमुभयोः प्रामाण्याप्रामाण्ययोः परतस्त्वं स्वीक्रियते।

ज्ञप्तौ प्रामाण्यस्य स्वतस्त्वम्

ज्ञानग्राहकसामग्रीग्राह्यत्वं ज्ञानग्राहकातिरिक्तानपेक्षत्वं वा ज्ञप्तिगतस्य प्रामाण्यस्य स्वतस्त्वमुच्यते[6]। गुरुमिश्रभट्टमतभेदेन त्रैविध्यमवाप्नुवद्भिः त्रिविधैरपि मीमांसामतावलम्बिभिः ज्ञप्तिगतस्य ज्ञानप्रामाण्यस्य समानसामग्रीग्राह्यत्वात्मकं स्वतस्त्वमेव संस्थाप्यते।

गुरुमतम्

गुरुमते ज्ञानस्य स्वप्रकाशतया ज्ञानोत्पादिका सामग्र्येव ज्ञानग्राहिका। अनया ज्ञानोत्पादिकया सामग्र्या तज्ज्ञानीयप्रामाण्यमप्यवगम्यते।

यदि ज्ञानोत्पादिका सामग्री ज्ञानग्राहिकया सामग्र्या भिन्नत्वेनाङ्गीक्रियते तर्हि उत्पत्तिक्षणेऽनिश्चयाद् ज्ञानस्य स्वप्रकाशत्वमनुपपन्नं स्यात्। अस्याऽनुपपत्तेर्निवारणार्थमेव त्रिपुटीप्रत्यक्षमङ्गीक्रियते प्राभाकरैः। अनेन त्रिपुटीप्रत्यक्षेण न केवलं विषयविषयिज्ञातॄणां त्रयाणां ज्ञानमुत्पद्यते गृह्यते च अपितु अनेनैव ज्ञानस्य प्रामाण्यमपि निश्चीयते।[7]

एवं त्रिपुटीप्रत्यक्षात्मिकया एकयैव सामग्र्या ज्ञानस्य प्रामाण्यस्य च ग्रहणात् समानसामग्रीग्राह्यत्वात्मकं प्रामाण्यस्य स्वतस्त्वं सिद्ध्यति।

मिश्रमतम्

मुरारिमिश्रास्तु अयं घट इत्याकारकं ज्ञानं घटमहं जानामीत्याकारकेन मानसेनानुव्यवसायात्मकेन ज्ञानेन गृह्यत इति मन्यन्ते। एतेषां मते अनुव्यवसायात्मिकया ज्ञानग्राहकसामग्र्यैव ज्ञानप्रामाण्यस्यापि ग्रहणात् समानसामग्रीग्राह्यत्वात्मकस्य ज्ञप्तिगतस्य प्रामाण्यस्य स्वतस्त्वमक्षुण्णमेव।[8]

भाट्टनये प्रथमं तावद् घटोऽयमित्याकारकं ज्ञानं जन्यते। एतदनन्तरम् अनेन ज्ञानेन स्वविषये घटे ज्ञाततासञ्ज्ञकः कश्चित् धर्म उत्पाद्यते। ज्ञाततेयं घटज्ञानानन्तरं 'ज्ञातो मया घट' इत्याकारकेन मानसेन ज्ञानेन प्रतिसन्धीयते। अस्या ज्ञाततायाः घटज्ञानात्प्रागनवस्थानाद् ज्ञानोत्पत्त्यनन्तरमेव प्रतिसन्धानाच्च ज्ञायते यदियं ज्ञातता घटादिज्ञानजन्यैव। अस्याः ज्ञाततायाः स्वकारणेन घटादिज्ञानेन विनोत्पत्तेरनुपपत्तिर्जायते। अत एवास्यानुपपत्तेर्निराकरणार्थमुपपादकीभूतया ज्ञाततान्यथानुपपत्तिप्रसूतार्थापत्त्या ज्ञाततजनकत्वेन ज्ञानं गृह्यते। अनेन ज्ञानेन सह याथार्थ्यलक्षणं प्रमात्वात्मकं ज्ञानप्रामाण्यमपि अनयैवार्थापत्त्या गृह्यते। एवं ज्ञानग्राहिकया सामग्रीभूतयार्थापत्त्यैव ज्ञानप्रामाण्यस्यापि ग्रहणात्[9] समानसामग्रीग्राह्यत्वं समानसंवित्संवेद्यत्वात्मकं[10] वा प्रामाण्यस्य स्वतस्त्वं निष्पद्यते।

भट्टपादैस्तावत् श्लोकवार्तिके-

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते।।[11]

इत्यनया कारिकया सर्वेषां ज्ञानानां स्वतःप्रामाण्यं साधितम्।

एवमेव पार्थसारथिमिश्रैरपि न्यायरत्नमालायां-

विज्ञानस्य प्रमाणत्वं स्वतो निर्णीयते यथा।
परतश्चाप्रमाणत्वं तथा न्यायोऽभिधीयते।।[12]

इत्यारभ्य "तस्मात्स्वतः सिद्धं प्रामाण्यं सर्वज्ञानानां तच्च वेदस्यानुमोदितमित्यनया[13] पङ्क्तया सर्वेषां ज्ञानानां स्वाभाविकं स्वतःप्रामाण्यं प्रतिपादितम्।

नूतनायां विचारधारायां सर्वपल्लिभिः डॉ० राधाकृष्णन्महाभागैरपि एवमेव प्रतिपादितम् "The Mimamsa theory of self validity prounts out that validity is a quality of all knowing inseparable from it."[14]

अस्मिन्सन्दर्भे सप्तदशशताब्द्याः मध्यकाले लब्धप्रतिष्ठैः विश्वेश्वरभट्टापरनामधेयैः श्रीमद्गागाभट्टमहाभागैः भाट्टचिन्तामणेः तर्कपादे-

"कश्चित्तु तेन वेदजन्यज्ञाने संशयाभावात्स्वतःप्रामाण्यं तदभिन्नज्ञाने तु परतः प्रामाण्यं ज्ञायते। अत एव स्मृतिजन्यज्ञाने सन्मूलकत्वगुणज्ञानादेव प्रामाण्यं सिद्धान्तेप्यङ्गीकृतमिति युक्तमुत्पश्यामः।"[15] अत्र "युक्तमुत्पश्यामः" इत्यनेन वेदज्ञानस्य स्वतः प्रामाण्यं तदतिरिक्तेषु स्थलेषु परतः प्रामाण्यमङ्गीकुर्वद्भिर्यद्यपि भाट्टमीमांसानव्यन्यायविचारसरण्योः समन्वयात्मिका दृष्टिरेका स्थापिता, परन्तु अस्मिन्विवेचने ज्ञानमात्रस्य स्वाभाविकं यत् प्रामाण्यमासीत् तद्विनष्टमेव। वेदवत्त्वेनैव ज्ञानस्य प्रामाण्याङ्गीकारात् ज्ञानप्रामाण्यस्य स्वतस्त्वमेव विलुप्तमतो, नास्ति भट्टवर्याणामयं विपश्चिदपश्चिमो सिद्धान्त इति।

ज्ञानप्रामाण्यस्योत्पत्तिगतज्ञप्तिगतयोरुभयत्र स्वतस्त्वमङ्गीकुर्वतां मीमांसकानां मते यावत्कालपर्यन्तं पर्याप्तैः प्रमाणैः प्रमात्वेनाङ्गीकृतस्य ज्ञानस्य दोषवत्त्वात्मकप्रामाण्यं न गृह्यते तावत्कालपर्यन्तं तस्य ज्ञानस्योभयात्मकं प्रामाण्यं स्वतः सिद्धम्। प्रामाण्यत्वेन निश्चितेऽपि ज्ञाने प्रबलतरैः प्रमाणैरप्रामाण्यग्रहाशङ्कयाऽप्रामाण्यस्य परतस्त्वमेवाङ्गीकृतं भाट्टैः।

अस्माकं राष्ट्रस्य विधिशास्त्रेऽपि दोषवत्त्वात्मकस्याप्रामाण्यस्य सिद्धिकाल-

पर्यन्तं दोषाभावात्मकं प्रामाण्यं स्वतः सिद्धत्वेनाङ्गीक्रियते। भाट्टानामपि ज्ञानप्रामाण्यस्य स्वतस्त्वे अप्रामाण्यस्य च परतस्त्वाङ्गीकारे अयमेव विचारः परिलक्ष्यते।

सन्दर्भ

1. 'प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिताः' सर्वदर्शनसङ्ग्रहः पृ०-557, चौखम्बा विद्याभवनं, वाराणसी, 1964
2. "अथैवमप्यप्रामाण्यं परतस्तर्हि प्रामाण्यमपि परत एव गृह्यताम्।" तर्कभाषा, पृष्ठ सङ्ख्या-141, चौखम्बा संस्कृत संस्थानम्, वाराणसी, 1982
3. 'सौगताश्चरमं स्वतः'-सर्वदर्शनसङ्ग्रहः, पृ०-557
4. प्रमां प्रति गुणः कारणम्। न्यायसिद्धान्तमुक्तावली पृ०-427, चौखम्बा-संस्कृत-संस्थानम् वाराणसी, 1983
5. तथाहि-इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं, यथाऽप्रमा।' न्याय० सि० मु० पृ०-438 चौखम्बा संस्कृत संस्थानम्, वाराणसी, 1983
6. 'तेन ज्ञानग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य। तर्कभाषा पृष्ठ सङ्ख्या-136
7. गुरवस्तु घटादिमात्रविषयकं न ज्ञानं सर्वज्ञानानां त्रिपुटीविषयकत्वाङ्गीकारात्। त्रिपुटी च ज्ञानात्मविषयरूपा, तेन सर्वज्ञानं घटं जानामीत्याद्यनुव्यवसायाकारमिति। स्वेनैव स्वस्य घटादिविषयकग्रहणात्ततः प्रामाण्यमित्याहुः।" भाट्टचिन्तामणिः पृ०-14, चौखम्बा-संस्कृत-ऑफिस-सीरिज, 1933
8. 'मुरारिमिश्रास्तु घटादिज्ञानोत्तरं घटं जानामीत्याद्यनुव्यवसायो जायते तेन घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहं, इत्याहुः।' भाट्टचिन्तामणि, पृ०-14
9. तस्मात् प्रवृत्तेः पूर्वमेव ज्ञाततान्यथानुपपत्तिप्रसूतयाऽर्थापत्त्या ज्ञाने गृहीते ज्ञानगतं प्रामाण्यमप्यर्थापत्त्यैव गृह्यते।' तर्कभाषा पृ०-137
10. ''प्रमात्वस्याननुमेयत्वात् ज्ञानानुमाने समानसंवित्संवेद्यतया ज्ञानत्ववत्प्रमात्वस्य स्वतस्त्वसम्भवात्।'' भाट्टचिन्तामणि, पृ०-13
11. श्लोकवार्त्तिकम् अ० 1, पा० 1, श्लो० सं०-47
12. न्यायरत्नमाला पृ०-36 चौखम्बा-संस्कृत सीरीज, ई० 1900
13. न्यायरत्नमाला पृ०-39
14. Indian Philosophy-Dr. S. Radhakrishnan, Volume II Blackee & Son publishers. Pvt. Ltd. Bombay, Calcutta, Madras, New Delhi, p. 406
15. भाट्टचिन्तामणिः, पृ० सं०-15

5
ख्यातिवादे विपरीतख्यातिः

भारतीयेषु सर्वेष्वपि दर्शनेषु ज्ञानं यथार्थायथार्थभेदेन प्रायः द्विधा विभक्तं वर्तते[1]। पदार्थस्य यादृशं स्वरूपं, तादृशमेव समुत्पन्नं ज्ञानं यथार्थज्ञानमुच्यते। वस्तुनः स्वरूपाद्विपरीतं प्रतीयमानं ज्ञानमयथार्थज्ञानं, भ्रमज्ञानं विपर्ययज्ञानं वोच्यते[2]।

दर्शनसम्प्रदायेषु भ्रमपर्यायत्वेन ख्यातिशब्दो गृह्यते। यद्यपि ख्यातिशब्दस्य ज्ञानमात्रमर्थः[3], तथापि सविकल्पकप्रत्यक्षमनङ्गीकुर्वतो बाह्यार्थस्य चाप्रामाण्यवादिनोर्बौद्धवेदान्तिनोः विचारसरण्योः प्रत्यक्षस्य सविकल्पकत्वे आत्मख्यातिरनिर्वचनख्यातिरूपेणाङ्गीकृतोऽयं ख्यातिशब्दः प्रचलनपरम्परया रूढितः भ्रमस्यार्थे एव पर्यवसितः।

अस्मिन्विषये दार्शनिकसम्प्रदायेषु विद्यमानाः परस्परविरोधिनः सिद्धान्ताः पञ्चख्यातिरूपेण प्रसिद्धाः। आत्मख्यातिरसत्ख्यातिरख्यातिरन्यथाख्यातिर-निर्वचनख्यातिरूपाः। इमाः पञ्चख्यातय इति प्रायोवादः।

एतासु पञ्चख्यातिषु निरालम्बनवादिनः विज्ञानवादिनो वात्मख्यातेरु-पस्थापकाः। बाह्यार्थानामस्तित्वमनङ्गीकुर्वतामेतेषां सिद्धान्ते बाह्यार्थाः केवलं विज्ञानस्यैवाकारविशेषाः। आत्मनः स्वरूपमेभिः गुणादीनामालम्बनत्वेन नाङ्गीक्रियते, अपितु जाग्रत्सुषुप्त्यवस्थयोः क्रमशः प्रवृत्त्यालयधारया प्रवाहितस्य क्षणिकस्यात्मनो विज्ञानरूपत्वमेव स्वीक्रियते।

विज्ञानमेव हि केवलं सद्रूपेणाङ्गीक्रियते एभिरत एव बाह्यार्थानां मिथ्यात्वात् घटपटादीनां प्रतिभासकस्य सविकल्पकप्रत्यक्षस्यापि प्रामाण्यमेतेषां नाभिमतम्। स्वप्नावस्थायामनुभूतानां पदार्थानामनुरूपं बाह्यार्थानामपि ज्ञानरूपत्वमेव एभिः प्रतिपाद्यते। अस्मादेव कारणात् विज्ञानवादिनां सिद्धान्तोऽयमात्मख्यातिशब्देन व्यवह्रियते।

असत्ख्यातिवादिनां माध्यमिकानां शून्यवादे न केवलं बाह्यार्थानामस्तित्व-

मनभिमतमपितु विज्ञानमपि व्यवहारकाल एव स्वीक्रियते। पारमार्थिकतया कस्यापि सतोऽस्तित्वमनङ्गीकुर्वतामेतेषां सिद्धान्तोऽसत्ख्यातिवादः शून्यवादो वोच्यते।

अत्राख्यातिवादिनां प्राभाकराणां सम्प्रदायेऽयथार्थज्ञानमेव न स्वीक्रियते। शुक्तिरजतस्थले जायमानायां प्रवृत्तौ शुक्तिरजतयोः परस्परमत्यन्तभिन्नत्वादेतयोः संसर्गग्रहस्य कारणत्वमेभिः नाङ्गीक्रियतेऽपितु इदमित्याकारकेन प्रत्यक्षात्मकेनानुभवेन सह पूर्वानुभूतस्य रजतस्य स्मृतौ सञ्जातायां (स्मरणशक्तेर्दोषात्मकात्) स्मृतिप्रमोषात् प्रत्यक्षस्मृतिज्ञानविषययोरिदंशुक्ति रजतयोः भिन्नज्ञानविषयत्वस्याग्रहादख्यातिरूपस्य भेदज्ञानस्यानुत्पत्तिरेव रजतविषयिण्यां प्रवृत्तावेभिः कारणत्वं प्रतिपाद्यते।

प्राभाकराणां सिद्धान्तोऽयं दार्शनिकेषु अख्यातिवादरूपेण प्रसिद्धः। तार्किकवीथिकायामङ्गीकृतान्यथाख्यातिरेव भाट्टमतावलम्बिभिर्विपरीतख्यातिरिति व्यवह्रियते। ज्ञानस्य वैपरीत्यमन्यथात्वं वा प्रत्यक्षानुमानागमाभासेभ्यः सञ्जायते। इदं रजतमित्यादौ शुक्तिकायाः स्थाने प्रत्यक्षेण प्रतीयमानं रजतं प्रत्यक्षाभास इत्युच्यते। धूलिपटले धूमभ्रमाद्वहन्यभाववत्यधिकरणे जायमाना वहन्यनुमितिरनुमानाभासजैव। नदीतीरे पञ्च फलानि सन्तीत्यादीनि प्रतारकवाक्यानि आगमाभास इत्युच्यन्ते[4]। एतेषु प्रमाणाभासेषु प्रत्यक्षाभासात्मके भ्रमविषये दार्शनिकसम्प्रदायेषु महती विप्रतिपत्तिः दृग्गोचरीभवति।

अद्वैतवेदान्तिभिः शुक्तिरजतस्थले समुत्पन्नायां रजतप्रतीतावनिर्वचनख्यातिरङ्गीक्रियते। शुक्तिरजतस्थले इदं रजतमित्यत्र चक्षुः प्रणालिकया शुक्त्या सह सम्बद्धाऽपि अन्तःकरणवृत्तिः शुक्तेर्यथार्थरूपं न गृह्णाति। अतएव शुक्तेरावरणभङ्गाभावाच्छुक्त्यवच्छिन्ने चैतन्ये विद्यमाना अविद्यैव रजताकारेण विपरिणमते। उत्तरकालिकशुक्तिज्ञानप्रबाध्यतयाऽस्य रजतस्य शशशृङ्गवदसत्त्वमप्यङ्गीकर्तुमशक्यत्वात्सदसद्भ्यामुभयविलक्षणत्वमनिर्वचनीयत्वमेवाङ्गीक्रियतेऽद्वैतवादिभिः[5]।

सदसद्ख्यातिवादिभिः साङ्ख्यैर्बाह्यार्थानामनुभवस्तदाकाराकारितया बुद्धिवृत्त्या एवानुमन्यते। विज्ञानवादिनामनुरूपमेभिः केवलं ज्ञानात्मिकायाः बुद्धेरस्तित्वमेव नाङ्गीक्रियतेऽपितु बाह्यार्थानामपि सद्रूपत्वमेभिरभिमतम्। एस्यां विचारधारायां यस्मिन् ज्ञाने बुद्धावाकारितस्य पदार्थरूपस्य बाह्यपदार्थरूपेण सह एकाकारिता भवेत्, तदेव ज्ञानं यथार्थज्ञानत्वेनाङ्गीक्रियते।

भ्रमस्थले तु शुक्ताविदं रजतमित्यादौ रजतप्रतीतौ सञ्जातायामिदंस्त्वांशस्य विद्यमानता इदं ज्ञानाश्रयस्य च चाक्षुषप्रत्यक्षविषयत्वादिदंत्वांश-विषयकस्य ज्ञानस्य सद्रूपत्वं स्वीक्रियत एभिः, परन्तु रजतज्ञानाश्रयस्याविद्यमानतया नेदं रजतमित्य-नेनोत्तरकालिकेन ज्ञानेन प्रबाधितत्वाच्च रजतविषयकस्य ज्ञानस्य, रजतांशविषयकं ज्ञानमसदेवाङ्गीक्रियते। एवञ्च भ्रमज्ञानस्य, सदसतोरुभयविधयोर्ज्ञानयोराश्रितत्वा-देतेषां सिद्धान्तोऽयं सदसत्ख्यातिवाद इत्युच्यते।

साङ्ख्यमतावलम्बिभिर्विज्ञानभिक्षुभिस्तावदुच्यते, यत् सर्वेषां पदार्थानां नित्यत्वात् स्वरूपत एतेषां बाधो न सम्भवति, परन्तु चैतन्ये आरोपिते सति इमे संसर्गतः प्रबाध्यन्ते। यथापणे सद्रूपेण स्थितमपि रजत शुक्तावारोपितं संसर्गतः प्रबाध्यते तथैव सद्रूपेण विद्यमानमपि जगत् चैतन्येऽध्यस्ते संसर्गतोऽसद्भवति। अस्मिन्नपि पक्षे ख्यातेः सदसदात्मकत्वमक्षुण्णमेव[6]।

अत्र शुक्तिरजतमित्यादौ प्रतीतं रजतं देशान्तरे सदेवोच्यते वैशेषिकादिभिः। तत्रैव तात्कालिकं सदित्युच्यते भास्करेण। शुक्ताविदं रजतमित्यस्मिन् ज्ञाने प्रसिद्धशुक्तिरजतत्वयोरलीकस्य समवायस्य भासादत्रासत्ख्यातिरेव प्रतिपाद्यते वाचस्पतिमिश्रैः। रामानुजीयास्तु इदं रजतमित्यत्र भूतानां पञ्चीकरणात्सर्वत्र सर्वेषां विद्यमानतया शुक्तावपि रजतस्य सत्त्वाङ्गीकाराद्रजतप्रतीतौ सत्ख्यातिमङ्गीकुर्वन्ति[7]।

भाट्टानां विपरीतख्यातिः

भ्रमज्ञानेषु विपरीतख्यातिरङ्गीक्रियते कौमारिलैः। भ्रमात्मकेषु ज्ञानेषु अतद्वति तत्प्रकारकत्वरूपा याऽन्यथाख्यातिरङ्गीकृता तार्किकैः, प्रायः तादृशी एव वर्तते इयं विपरीतख्यातिः। यथोक्तं- तस्माद्यन्यथासन्तमन्यथा प्रतिपाद्यते[8]।' इत्यस्य वार्तिकांशस्य अन्यथा=शुक्तिकादिरूपेण सन्तमन्यथा रजतादिरूपेण गृह्णातीत्यर्थः रत्नाकरकृता प्रतिपादितः। इदं रजतमित्यत्र शुक्तित्वप्रकारिकायाः शुक्तेः रजतत्वप्रकारकत्वेन जायमानत्वादिदं रजतमित्यस्य ज्ञानस्य भ्रमात्मकत्वं वर्तते। अत्रेन्द्रियदोषाल्पप्रकाशसंयोगचाकचक्यादि सामग्र्या शुक्तित्वधर्मविशिष्टायाः शुक्तेः वस्तुतत्त्वस्य वैपरीत्येन रजतत्वधर्मविशिष्टतया जायमानेन विपरीतख्यातिरूपेण भ्रमात्मकेन ज्ञानेनैव शुक्तौ प्रतीयमाने रजते पुरुषप्रवृत्तिव्यवहारश्च सङ्गच्छते।

अस्यां विपरीतख्यातौ भ्रमस्थलेषु सर्वत्र सत्पदार्थयोरपि उद्देश्यविधेयसंसर्ग-स्यालीकत्वेनैव वैपरीत्यं सञ्जायते। इदं रजतमित्यस्मिञ्ज्ञाने यथा इदत्वांशस्य

याथार्थ्यं वर्तते, तथैव रजतस्याप्यन्यत्रास्तित्त्वं वर्तते एव। एतयोरुभयोरपि सत्पदार्थयोरुद्देश्यविधेयात्मकस्य संसर्गस्यालीकत्वमत्र वैपरीत्ये हेतुः। एवमेव द्विचन्द्रज्ञाने आकाशे विद्यमानयोर्भागद्वयोरेकत्र सञ्ज्ञातेनालीकेन संसर्गेणैव एकस्य चन्द्रस्य स्थाने चन्द्रद्वयात्मिकी विपर्यस्ता प्रतीतिः सञ्जायते। संसर्गस्यालीकत्वेनैव एतादृशेषु स्थलेषु अकार्यस्य कार्यतया भानाद् व्यावहारिकी विप्रतिपत्तिरपि दृष्टिपथे समायाति[9]। यथा 'अयं सर्प' इत्यादौ रज्जुसर्पज्ञान- स्थलेऽयमित्युद्देशेन यदा सर्पो विधीयते, तदा रज्जुसर्पोभयपदार्थयोरलीकेनानेन संसर्गेण सर्पभयस्य अकार्यत्वेऽपि कार्यतया व्यवहारो जायते। 'सर्वत्र संसर्गमात्रमसदेवावभासते। संसर्गिणस्तु सन्त एव, सेयं विपरीतख्यातिरित्युच्यते मीमांसकैः'[10]। इत्थं वदता पार्थसारथिमिश्रेणापि विपरीतख्यातौ संसर्गिणां, याथार्थ्यमङ्गीकृत्य संसर्गस्यैवालीकत्वं प्रतिपादितम्।

विपरीतख्यात्यख्यात्योर्वैभिन्न्यम्

उभयोरप्येतयोर्ख्यात्योर्महदन्तरं प्रतीयते। प्राभाकराणामख्यातिवादे भ्रमस्यास्तित्वमेवास्वीकृतम्। भाट्टानां विपरीतायां ख्यातौ संसर्गतया भ्रमज्ञानस्यास्तित्त्वमभिमतम्।

अख्यातिवादे विवेकाग्रहरूपं यत् कारणत्वं प्रतिपादितं वैपरीत्ये, तदभावात्मकं वर्तते, परन्तु विपरीतख्यातौ रजतत्ववस्तुत्वांशयोः संसर्गग्रहस्य कारणत्वाद् भावात्मकमेव भ्रमकारणत्वमङ्गीकृतमित्यनुभूयते।

विपरीतख्यात्यन्यथाख्यात्योः पार्थक्यम्

यद्यपि प्राच्यप्रतीच्यैः बहुभिरपि विद्वद्भिः विपरीतख्यात्यन्यथाख्यात्योस्तादात्म्यमेवाङ्गीक्रियते, तथापि सूक्ष्मेक्षिकया उभयोरेतयोर्मध्ये किञ्चित्पार्थक्यमपि उद्भावयितुं शक्यते। प्रथमं तावत् उभयोरप्येतयोः ख्यात्योः ज्ञानग्रहणप्रक्रियायां मिथः भेद उपलभ्यते। तथाहि–अन्यथाख्यातिमङ्गीकुर्वतां नैयायिकानां विचारधारायां यथा प्रवृत्तिवैफल्यमूलकेनानुमानेन ज्ञानस्यायथार्थत्वं परतः स्वीक्रियते तथैव प्रवृत्त्युत्तरकालिकेन प्रवृत्तिसाफल्यहेतुकेनानुमानेन ज्ञानस्य यथार्थत्वमपि परत एवाङ्गीक्रियते।

भाट्टनये तु सर्वेषां ज्ञानानामनुभूतिकाले प्रामाण्यमेवाभिमतम्। शुक्तिरजतस्थलेष्वपि यावत्कालपर्यन्तं विफलप्रवृत्तेः कारणदोषानुगमाच्च मिथ्यात्वनिर्णयो न जायते, तावत्कालपर्यन्तं ज्ञानस्य प्रामाण्यमेव वर्तते। एवञ्च पार्थक्यं तावदेतदेव

वर्तते, यद्न्यथाख्यातिवादे ज्ञानस्य विफलप्रवृत्तिहेतुकत्वेनानुमानेनाप्रामाण्यग्रहपर्यन्तं प्रामाण्याप्रामाण्योभयकोटिभ्यां भिन्नज्ञानस्य केवलं ज्ञानरूपत्वमेव वर्तते। परन्तु विपरीतख्यातिनये मिथ्यात्वनिश्चयो यावन्न जायते तावत्कालपर्यन्तमनुभूतस्य ज्ञानस्य प्रामाण्यमेवाङ्गीक्रियते।

भ्रमस्य कारणसामग्र्या भेदादपि अन्यथाख्यातितः विपरीतख्यातेः पार्थक्यमवलोक्यते। तथाहि अन्यथाख्यातिवादे इदं रजतमित्यत्र शुक्तिकायामविद्यमानत्वेऽपि आपणे पूर्वानुभूतस्य रजतस्य स्मरणात्मकेन ज्ञानलक्षणसञ्ज्ञकेनालौकिकसन्निकर्षेण प्रत्यक्षं जायते। इदंत्वांशस्य लौकिकसंयोगसन्निकर्षजन्यतयात्र लौकिकाभ्यां सन्निकर्षाभ्यां जायते इयं भ्रान्तिः[11]।

एवमत्र भ्रमकारणसामग्र्यां पित्ताल्पपरिमाणदूरत्वादिभिर्दोषैस्सह अलौकिकसन्निकर्षस्याप्यस्तित्वमभिमतं वर्तते।

एतद्विपरीतं भाट्टाभिमतायां विपरीतायां ख्यातौ अनुभूतस्य ज्ञानस्याप्रामाण्यं मिथ्याज्ञानाज्ञानसन्देहादिभिः त्रिभिरङ्गीक्रियते।

यथोक्तं- **अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाऽज्ञानसंशयैः।**
वस्तुत्वाद् द्विविधस्यात्र सम्भवो दुष्टकारणात्[12]।।

एवमेव 'यत्र कारणदोषज्ञानं बाधकज्ञानं तत्र मिथ्यात्वमिति वदता पार्थसारथिमिश्रेणापि भ्रमस्योत्पत्तौ दोषाणां हेतुत्वं स्वीक्रियते[13]। अतएव भाट्टप्रघट्टे यद्यपि नैयायिकानामनुरूपं भ्रमस्योत्पत्तौ दोषाणां कारणत्वमभिमतं वर्तते, तथापि अलौकिकसन्निकर्षमनङ्गीकुर्वतामेतेषां सिद्धान्ते भ्रमस्य कारणसामग्र्यां ज्ञानलक्षणायास्तित्वमभिमतं नैव प्रतीयते।

श्लोकवार्तिके-''**सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनात्**[14]'' इत्यस्य जैमिनिप्रणीतस्य प्रत्यक्षसूत्रस्य व्याख्यानप्रसङ्गे- 'न लोकव्यतिरिक्तं हि प्रत्यक्षं योगिनामपि[15]। इत्यनेन वार्तिकेन ज्ञायते यद् लौकिकप्रत्यक्षातिरिक्तं योगजज्ञानलक्षणादीनां सर्वेषामलौकिकसन्निकर्षजन्यानाम- लौकिकप्रत्यक्षाणामस्तित्वं नाभिमतं भाट्टानाम्। अत एव भ्रमज्ञानस्य प्रक्रियायां यद्यपि अन्यथाख्यातिविपरीतख्यात्योरेकरूपता वर्तते, तथापि भाट्टमते ज्ञानलक्षणाया नाङ्गीकारादन्यथाख्यातितः विपरीतख्यातेः कारणसामग्रीभेदादपि वैभिन्यं वक्तुं शक्यते।

अत्र अयमेव निष्कर्षः। सर्वैरपि वादिभिः येन केन रूपेण यथार्थज्ञान-वदयथार्थज्ञानमपि स्वीकृतम्। शुक्तिकायाः स्थाने रजतं प्रतीयते इत्यत्र वैपरीत्ये नास्ति विप्रतिपत्तिः। वैपरीत्यं कथं जायते? इत्यत्र प्रकारांशे एव सन्ति विप्रतिपत्तयः दार्शनिकेषु। स्वसम्प्रदायदृष्ट्या सर्वैः समाधानान्यपि प्रदर्शितानि सन्ति। पथां वैभिन्येऽपि लक्ष्यं वस्तु एकमेव वर्तते। उक्तमपि-'**एकं सद् विप्रा बहुधा वदन्तीति** दिक्।

सन्दर्भ

1. 'अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते। न्या०सि०मु० पृ०- चौखम्बा संस्कृत संस्थानम्, वाराणसी, 1983, 126
2. तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता। न्या०सि०मु० पृ०-127
3. ख्यातिः ज्ञानम्। न्यायकोशः, पृष्ठ सं०-255, भाण्डारकर-ओरिएंटल-रीसर्च इन्स्टीट्यूट-पुण्यपत्तनम्, 1928
4. न्यायकोशः पृष्ठसङ्ख्या-765, भाण्डारकर-ओरिएण्टल रीसर्च इंस्टीट्यूट, पूना, 1928
5. वेदान्तपरिभाषा भूमिका पृ०-26, चौखम्बा विद्याभवनं, वाराणसी, 1977
6. वेदान्त-परिभाषा-भूमिका पृष्ठ-23-24, चौखम्बा विद्याभवनं, साङ्ख्य-तत्त्व-कौमुदी-भूमिका-पृष्ठ-84, वाराणसी, 1977 चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 1971
7. न्यायकोशः, पृष्ठ-760, भाण्डारकर ओरियन्टल रीसर्च इन्स्टीट्यूट-पुण्यपत्तनम्, 1928
8. श्लोकवार्तिकम्, पृष्ठसङ्ख्या-202
9. वेदान्तपरिभाषा-भूमिका पृष्ठसङ्ख्या-25-26
10. शास्त्रदीपिका पृ० सं०-137 चौखम्बा संस्कृत बुक डिपो, वाराणसी।
11. तर्कसङ्ग्रह-पद्माख्या व्याख्या पृष्ठ सं०-215, कामेश्वरसिंह दरभङ्गा-संस्कृत विश्वविद्यालयः दरभङ्गा, 1984। "ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्यादोषत्वात्" न्यायसिद्धान्तमुक्तावली-चौखम्बासंस्कृतसंस्थानं, वाराणसी, तृतीयं संस्करणम्, 1984
12. श्लोकवार्तिकम्, द्वितीये सूत्रे वार्तिक सङ्ख्या-54
13. शास्त्रदीपिका-पृष्ठ सं०-142, चौखम्बा संस्कृत बुक डिपो, वाराणसी।
14. मीमांसादर्शनम् जैमिनिसूत्रं अ० 01, पा० 01, सूत्रं 04
15. श्लोकवार्तिकम्-चतुर्थे सूत्रे वार्तिक सं० 28

6
आत्मवादे भाट्टानामनेकान्तवादः

भारतीयं चिन्तनं प्रामुख्येनात्मतत्त्वविचारं परित एव परिव्याप्तं प्रतीयते। आस्तिकनास्तिकभेदेन विभक्तैर्विविधदर्शनमतावलम्बिभिस्स्वसिद्धान्तदृष्ट्या प्रमेय-विचारावसरे प्रामुख्यमात्वमतत्त्वविचारायैव प्रत्तमिति स्पष्टं परिलक्ष्यते।

शरीरेन्द्रियविज्ञानात्मवादिभ्यो बौद्धचार्वाकेभ्यो व्यतिरिक्तेषु सर्वेष्वपि दर्शन-सम्प्रदायेषु देहेन्द्रियमनोबुद्धिभ्यो व्यतिरिक्तस्यात्मनो नित्यत्वं स्पष्टमेव।

न्याय-वैशेषिकैस्तावदात्मनोऽनेकत्वं, नित्यत्वं विभुत्वञ्च मन्यते।[1] सर्वव्यापकत्वेऽप्यस्यात्मनो भावविचारसङ्कल्पा उत्पत्तिकाले स्वसंयुक्तस्थूलदेह-परिमिता एवैभिः प्रतिपाद्यन्ते।[2] मुक्तौ सुषुप्तौ चात्मनस्सद्भावेऽपि ज्ञानेच्छाप्रयत्न-सुखादीनामननुभवादद्वैतमतानुरूपमात्मनो ज्ञानात्मकत्वं सुखात्मकत्वं वा नाभिमतमेतेषामपितु द्रव्यात्मक आत्मनि समवायसम्बन्धेनोत्पन्नानामेतेषा-मात्मगुणत्वाज्ज्ञानसुखाश्रयत्वमेवात्मनस्स्वीक्रियते तार्किकैरेभिः। यतः स्वरूपतो विद्यमानस्याप्यात्मनो सुषुप्तौ मुक्तावस्थायाञ्च न जायते प्रतीतिरत एव स्वतः प्रकाशकत्वमप्यात्मनो न स्वीक्रियतेऽक्षपादमतावलम्बिभिरपितु 'अहं सुखी, अहं दुःखी, बुभुक्षुरहमित्यादिषु सुखदुःखादीनां विधेयानामुद्देश्यात्मकत्वेन मानसप्रत्यक्षत्वमेवाङ्गीक्रियते।[3] अहं जानेऽहं सुखीत्यादिषु मानसप्रत्यक्षत्वमपि स्वात्मन एव सम्भवति। परात्मनः परिज्ञानं परशरीरे चेष्टात्मिकया प्रवृत्त्या निष्पन्नैः 'परकीयं शरीरमवच्छेदकतासम्बन्धेन प्रयत्नवच्चेष्टावत्त्वात्, मच्छरीरवदित्यादिभि-रनुमानैरेव सङ्गच्छते।[4]

न्यायसमानतन्त्रे वैशेषिकनये यद्यप्यात्मनस्स्वरूपं प्रायः तार्किकमत-सम्मतमेव तथाप्यात्मनो ज्ञानविषये सूक्ष्मेक्षिकया किञ्चित्पार्थक्यमप्यवलोक्यते। आत्ममानसप्रत्यक्षविषये एभिः प्रतिपाद्यते यदहं सुखी इत्याद्याकारकमात्मनः प्रत्यक्षं योग्यविशेषगुणयोगेनैवोपपद्यते नत्वहमित्याकारकेण मानसप्रत्यक्षमात्रेण। अत

एवात्मनो मानसप्रत्यक्षत्वं निराकृत्य[5] प्राणापाननिमेषोन्मेषजीवन-मनोगतीन्द्रियान्तरविकारसुखदुःखेच्छाद्वेषप्रयत्नादिभिरात्मलिङ्गकैर[6]नुमानैरे-वात्मज्ञानमङ्गीक्रियते वैशेषिकैः।

एवमेव कापिलैरपि पुरुषपदवाच्यस्यात्मनो नित्यत्वमनेकत्वञ्चाङ्गीक्रियते। बुद्धिपरिणामेन ज्ञानेन[7] सहास्य पार्थक्यं यद्यपि साङ्ख्यैरपि स्वीकृतन्तथापि चैतन्यस्यात्मरूपत्वमेभिः प्रतिपाद्यते। एतद्विपरीतन्न्यायनये चैतन्यस्यात्मकत्वन्नैवाभि-मतमपितु ज्ञानाभिन्नत्वेनात्मगुणत्वमेवास्याभिमतमेतेषामिति प्रतीयते।

अद्वैतवेदान्तिनाम्मते जाग्रत्स्वप्नसुषुप्त्यात्मकेषु त्रिविधेष्वप्युपाधिषु क्रमशः स्थूललिङ्गाज्ञानशरीरैरवभासमानो जीवः शारीर आत्मा। यद्यपि पारमार्थिक्यामवस्था-याञ्जीवो ब्रह्मात्मक एव तथाप्यविद्यावशात् व्यावहारिक्यां सत्तायां परब्रह्मभिन्नो जीवः सुखदुःखावस्थयोर्बद्धः प्रतीयते। ब्रह्मसाक्षात्कारेण सञ्जातेऽविद्याविरहे पुनरप्यसौ पारमार्थिकीमवस्थामवाप्यात्मनस्सच्चिदानन्दात्मकं ब्रह्मस्वरूपमवाप्नोति।[8]

विशिष्टाद्वैतवादिभिरात्मनो यथार्थत्वन्धर्मभूतज्ञानवत्वञ्चित्स्वरूप-त्वञ्चाङ्गीक्रियते। यद्यप्यात्मनोऽणुपरिमाणवत्वमेभिः प्रतिपाद्यते तथाप्यस्य ज्ञानदृष्ट्या सर्वव्यापकत्वमेवाभीप्सितम्। एवमेवात्मनो ज्ञानात्मकत्वमानन्दात्मकत्व-मप्येतेषामभिमतम्। ज्ञानानन्दयोर्व्यक्तावस्थायाम् अभावात्संसारावस्थायामात्मनो ज्ञानानन्दात्मकत्वं नानुभूयते, तथापि समधिगतायां मुक्तौ सर्वज्ञत्वमानन्दा त्मकत्वञ्चावाप्यते आत्मनेति वर्तते विशिष्टाद्वैतवादिनामाशयः।[9]

भेदाभेदवादे यद्यपि संसारावस्थायामात्मपरमात्मनोर्वर्तते भेदः परन्तु मोक्षावस्थायामस्य परमात्मना सहाभेदप्रतिपादनादात्मनः परमात्मना सहोपपद्यते भेदाऽभेदवादः।[10]

द्वैताद्वैतदर्शने नानाजीवानां भोगवैचित्र्यादनेकत्वमणुपरिमाणवत्वञ्चात्मनः प्रतिपाद्यते। अणुत्वेऽप्यस्यात्मनस्समग्रे शरीरे सुखदुःखानुभावकत्वं स्वगुणैर्विभुत्वं, नित्यत्वं, द्रष्टृत्वं, भोक्तृत्वं, ज्ञानाश्रयत्वेऽपि ज्ञानात्मकत्वञ्चाभिमतम्।[11]

द्वैतदर्शने मुक्तियोग्याः, तमोयोग्याः, नित्यसंसारिणश्चेत्यात्मनां त्रयो भेदाः प्रतिपादिताः। रामानुजस्य विशिष्टाद्वैतनये न केवलं संसारदशायामेव जीवेषु ब्रह्मनिरूपितो वर्तते भेदः, परन्त्वस्मिन्नये मोक्षावस्थायामपि जीवेषु न केवलं परमात्मनः पार्थक्यमभिमतमपितु मुक्तेष्वपि जीवेषु कामसङ्कल्पानन्दवैभिन्यात्पर-स्परमपि प्रतिपाद्यते पार्थक्यम्।[12]

शुद्धाद्वैतवादे जीवात्मनोऽणुपरिमाणवत्वं ब्रह्मात्मकत्वं ब्रह्मांशत्वञ्चाभिमतम्। शुद्धसंसारिमुक्तभेदेन त्रैविध्यमवाप्तेषु त्रिविधेषु जीवेषु संसारिणा जीवात्मनाऽपि लब्धायाम्मुक्तावस्थायामवाप्तात्माव्यक्तगुणेन ब्रह्मणा सहैकाकारतयाऽवाप्यतेऽ-भेदात्मिका स्थितिः।[13]

कला-विद्या-रागकालनियतिसञ्ज्ञकैः पञ्चमायाकञ्चुकैरावृत्तो, मायाशक्ति-प्रभावमुग्धतया परमसदाशिवात्मकं स्वरूपं विहाय कर्मरज्जुभिराबद्धोऽयं जीवात्मेत्यात्मस्वरूपं प्रतिपाद्यते काश्मीरीयशैवमतावलम्बिभिः।[14]

आर्हतदर्शने जीवाँजीवयोर्द्वयोः पदार्थयोर्मध्ये चेतनद्रव्यत्वेन जीवात्माऽभिमतः। अस्य जीवात्मनः कर्तृत्वं, भोक्तृत्वं, देहपरिमाणवत्वञ्चाभिमतमस्मिन्नये। यद्यप्यनन्तज्ञानशान्तिश्रद्धावीर्यसम्पन्नत्वेन स्वाभाविकी एव वर्तते जीवात्मनः परिपूर्णता, तथापि पुद्गलसंयोगेन संसारदशायामेतेषां गुणानां तिरोधानादस्या न जायते प्रतीतिः।[15] जीवोऽयमस्मिन्ननेकान्तवादनये जीवास्तिकायसञ्ज्ञया परिभाषितः पदार्थविशेष आत्मेति प्रतिपाद्यते।[16]

शरीरेन्द्रियमनआत्मवादश्चार्वाकाणां क्षणिकविज्ञानशून्यवादश्च बौद्धानामित्युप लभ्यन्ते प्रायः सर्वत्र दार्शनिकग्रन्थेषु पूर्वपक्षत्वेनास्तिकदर्शनेषु। एतेषामति प्रसिद्धत्वाद् विस्तरभयाच्च उल्लेखमात्रेणैवालं मन्ये।

मीमांसानये आत्मवादः

मीमांसाशास्त्रं हि कर्मकाण्डप्रधानम्। विधिवाक्यप्रतिपादितस्य यागानुष्ठानात्मकस्य धर्मस्य प्रतिपादनमेव मीमांसायाश्चरमं लक्ष्यम्।

"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्।[17] "दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः[18], इत्यादिभिर्वैदिकवाक्यैः प्रतिपादितस्य यागात्मकस्य कर्मणः फलेन सह सम्बन्धो यदि न स्यात्तर्हि न जायेत कस्याप्यस्मिन्कर्मानुष्ठाने प्रवृत्तिः। क्रियात्मकस्य यागस्यतृतियक्षणे विनाशात्कर्मणः फलसम्बन्धरक्षणार्थं यागकर्त्रे यागफलप्राप्तिपर्यन्तं विद्यमानं यागकर्मजन्यमदृष्टात्मकमपूर्वं कल्प्यते मीमांसकैः।

यथोक्तं तन्त्रवार्त्तिके-

फलाय विहितं कर्म क्षणिकं चिरभाविने।
तत्सिद्धिर्नान्यथेत्येवमपूर्वं प्रति गम्यते।।[19]

यागकर्मणशशरीरस्य च विनाशित्वेन फलप्राप्तिपर्यन्तं स्थितेरेतयोर-शक्यत्वाद्यागजन्यापूर्वस्याश्रयत्वेन देहेन्द्रियमनोबुद्धिभ्यः पृथगात्मतत्वं कर्म-प्रतिपादकानां वेदवाक्यानामुपपत्तयेऽङ्गीक्रियते मीमांसकैः।

आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्।[20]
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते।।

इत्यनेन वार्त्तिकेनापि वेदबोधितकर्मसु पुरुषप्रवृत्तयेऽपेक्षितस्य कर्मणः फलप्राप्तकर्तुस्सहान्वयस्योपपत्तये च देहेन्द्रियमनोबुद्धिभ्यः पृथगाश्रीयते शास्त्रेऽस्मिन्नित्यो जीवात्मेति जायते प्रतिपत्तिरियम्।

अस्य मीमांसाशास्त्रस्य प्रवर्त्तको भगवान् जैमिनिः "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्मतत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वादित्यनेन[21] प्रत्यक्षसूत्रच्छलेनात्मनो बुद्धेरिन्द्रियेभ्यश्च पार्थक्यं विनिर्दिशति।

आत्मविषयकं गुरुमतम्

भाट्ट-प्राभाकरमिश्रमतेषु मिश्रवर्याणामात्मविषयकमभिमतं नोपलभ्यते। भाट्ट-प्राभाकरयोरात्मज्ञानविषयकं परस्परं पार्थक्यमुपलभ्यते। प्राभाकराणां सिद्धान्तेऽप्यात्मनो विभुत्वं शरीरेन्द्रियमनोभ्यः पार्थक्यं, नित्यत्वं[22], विशेषगुणा नाम्बुद्ध्यादीनामाश्रयत्वं[23], कर्तृत्वं भोक्तृत्वञ्च न्यायभाट्टमतानुरूपमेवाभिमतं दृश्यते। एभिरप्यात्मनस्सुखादिस्वरूपत्वं निरस्यैतेषामाश्रयत्वमेव स्वीक्रियते। जीवेषु सुखदुःखादीनां वैचित्र्यादिमेप्यात्मनो नानात्वं मन्वते। अनया दृष्ट्या न्यायभाट्टविचार-सरणिभ्यामेतेषामात्मस्वरूपविषयकाणां विचाराणां महत्सादृश्यमवलोक्यते, तथाप्यात्मज्ञानविषये भाट्टमतेन सर्वथा विपरीता एवैतेषां वर्तते विचारसरणिः।

अहं जानामीत्यत्राहम्प्रत्ययगम्यस्यात्मनो मानसप्रत्यक्षवेद्यत्वमङ्गीक्रियते भाट्टैः नैयायिकैश्च। प्राभाकरैरत्रात्मनो प्रत्यक्षवेद्यत्वं न स्वीक्रियते। एतेषां मते परोक्षस्यात्मनः परिज्ञानं सर्वेषां ज्ञानानामाश्रयत्वेनानुमानमुखेनैव जायते।

स्मृत्यनुभवात्मकेषु सर्वेष्वपि ज्ञानस्थलेषु ज्ञानं, ज्ञाता, ज्ञेयात्मिकां, मितिमातृमेयात्मिकांवा त्रिपुटीमङ्गीकुर्वताम्प्राभाकराणां ज्ञानप्रक्रियायां सर्वेष्वपि ज्ञानेषु कर्तृत्वेनैवात्मनो जायते परिज्ञानं न तु कर्मतया, कुतः? कर्तृत्वकर्मत्वयोरेकत्र विरोधात्। अत्राऽऽश्रयविधयात्मनो विषयविधया घटादीनां विषयाणाञ्च प्रतिपाद्यते स्वप्रकाशकत्वेन ज्ञानेन प्रतिपत्तिः प्राभाकरैः।

प्राभाकराणामस्मिन्नपि सिद्धान्ते वर्तते मतद्वयम्। प्राचीनैः प्राभाकरैर्ज्ञानस्य स्वविषयत्वमात्मविषयत्वञ्च न स्वीक्रियते ज्ञानस्य तादात्म्येन स्वस्मिन्व्यवहार-प्रयोजकत्वमात्मनिस्वसमवायेन व्यवहारप्रयोजकत्वञ्चैभिः प्रतिपाद्यते ! नव्यानां मते तु एतद्विपरीतं ज्ञानस्य स्वविषयत्वे सति स्वाश्रयविषयत्वमप्यङ्गीक्रियते। स्वं स्वाश्रयञ्च विषयीकुर्वतो ज्ञानस्य स्वव्यवहारप्रयोजकत्ववत्स्वाश्रयव्यवहार-प्रयोजकत्वमप्यङ्गीकुर्वन्ति प्राभाकरेषु नव्याः।[24]

अथात्मवादे भाट्टमतम्

भाट्टमतेऽप्यात्मनो नैय्यायिकादिमतानुरूपं शरीरेन्द्रियबुद्धिभ्यां भिन्नत्वं, नित्यत्वञ्चाभिमतमवलोक्यते। यथोक्तं वार्त्तिके-

शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तत्वमात्मनः नित्यत्वं चेष्यते।[25]

भाट्टप्रस्थाने प्राथम्यमवाप्नुवद्भिः पार्थसारथिमिश्रैरपि प्राणनादिलिङ्गेन सुखादिगुणैश्चात्मनश्शरीरातिरिक्तत्वं सयुक्तिकं प्रदर्शितम्। तदनुसारेण कोष्ठ्यस्य वायोरूर्ध्वाधोगमनात्मकस्य प्राणनादिकस्य यो हेतुभूतः प्रयत्नस्तस्य सुखादिनाञ्च अयावच्छरीरभावित्वाद्देहभिन्नत्वमात्मनः। अत्रायमाशयः-शरीरस्य विद्यमानत्वेऽपि मृतावस्थायां तत्रानुपलभ्यमानत्वान्नैतेषां सुखादिनां प्रयत्नस्य च शरीरधर्मत्वमुप-पद्यतेऽतएवैतेषामाश्रयत्वेनात्मनो साध्यते देहभिन्नत्वमेभिः।[26]

एवमेव योऽहं रूपमद्राक्षं सोऽहं स्पृशामीत्यादिषु विभिन्नेष्विन्द्रियव्यापारेष्वपि एकस्यैवाहम्प्रत्ययगम्यस्यात्मनः परिज्ञानादिन्द्रियविशेषेण गृहीतस्यार्थस्य तस्येन्द्रियविघातेऽपि स्मृतेरुपपद्यमानत्वाच्चेन्द्रियभिन्नत्वमपि सयुक्तिकं प्रसाध्यते भाट्टमतावलम्बिभिर्मीमांसकैः।[27] मनसोऽपि सुखादिज्ञानानां करणत्वात् ज्ञातुर्ज्ञानकरणभेदस्य च प्रसिद्धत्वादात्मनो मनोभिन्नत्वमप्यनेन तर्केण साध्यते भाट्टैरेभिः।[28]

आत्मज्ञानसाधनम्

आत्मज्ञानप्रक्रियायां शबरस्वामिभिः स्वसंवेद्यः स भवति नासावन्येन शक्यते द्रष्टुं दर्शयितुं वे' त्यनया पङ्क्तया प्रतिपाद्यते स्वतः संवेद्यत्वं स्वप्रकाश-कत्वञ्चात्मनः।[29] 'स्वसंवेद्य' इत्यत्र भाष्ये कर्मवाचिनः कृत्यप्रत्ययस्य प्रयोगात् 'स मानसीन आत्मा जनानाम्' तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप' इत्येषां श्रुतिस्मृतिवाक्यानामनुरोधाच्च साध्यत आत्मन अहमिति मानसप्रत्ययगम्यत्वं भाट्टैः।[30]

तार्किकानुरूपमात्मनो मानसाहं प्रत्ययगम्यत्वाङ्गीकारे एकस्यैवात्मनि कर्तृत्वकर्मत्वयोरुभयोर्विद्यमानत्वाद्यः क्रियावृत्तिविरोध उद्भाव्यते प्राभाकरैस्तस्य, प्राभाकराभिमतायास्संवित्तेर्भासनात्मकस्य फलस्यार्थवित्तिषु भासमाने कर्तरि, आत्मन अपि सद्भावात् प्रभाकरमतेऽपि क्रियावृत्तिविरोधस्य तुल्यत्वारोपेण निराकरणं प्रदर्श्यते पार्थसारथिमिश्रैः।[31] अस्मिन् क्रियावृत्तिविरोधसन्दर्भे भट्टकुलावतंसैर्गागाभट्टापरनामधेयै विश्वेश्वरभट्टैः "स्वात्मनि क्रियाविरोधस्य दूषकताबीजभावेनादूषकत्वादित्यनया पङ्क्तया प्रतिपाद्यते यदात्मनि कर्तृत्वकर्मत्वयोरेकत्रसद्भावमात्रस्य नास्ति दूषकताबीजत्वमपितु यत्रैतयोरेकत्रसद्भावाज्जायते क्रियाविरोधस्तत्रैव वर्त्तते दूषणत्वं, यथा स आत्मानमचिन्तयत् तथापि नाबुद्ध इत्यत्र यत् चिन्तनक्रियाकर्तुरेवकर्मत्वं वर्त्तते, तस्यात्मनि चिन्तनक्रियायास्तद्विरोधिनो ज्ञानाभावस्य च विद्यमानत्वाद्वर्तते क्रियाविरोधः, परन्त्वहमात्मानं जानामीत्यत्र क्रियाविरोधस्याभावात्कर्तृत्व- कर्मत्वयोरेकत्वेऽप्यात्मनो मनसाअहमिति मानसप्रत्ययगम्यत्वाङ्गीकारे नास्ति काऽपि क्षतिः।[32]

परसमवेतक्रियाजन्यफलशालित्वमेव कर्मत्वमित्यङ्गीकृत्य अस्य कर्मत्वस्य मानसज्ञानगम्ये आत्मनि असाधुत्वादेतादृशस्य मानसप्रत्यक्षगम्यत्वस्यानौचित्यं प्रतिपाद्यते प्राभाकरैः।[33] अत्र वर्तते अयमाशयोः यद्देवदत्तो गृहं गच्छतीत्यत्र गृहात्परो यो देवदत्तः तस्मिन् समवेता या गमनक्रिया तज्जन्यं यद्गृहसंयोगात्मकं फलं, तस्य संयोगस्य द्विष्ठतया गृहे सद्भावादृगृहे यथोपपद्यते कर्मत्वमेतादृशस्य कर्मत्वस्यात्मानमहं जानामीत्यत्र ज्ञानक्रिया यत्र समवेता तस्यैवात्मनः ज्ञानक्रियाजन्यफलशालित्वादत्र विद्यमानाया द्वितीयाविभक्तेरसाधुत्वादसाधुत्वघटितस्य मानसज्ञानस्यात्मसाधनत्वाङ्गीकारे नास्त्यौचित्यम्।

आत्मनो मानसप्रत्यक्षात्मकस्य ज्ञानस्य प्राभाकरैः प्रदर्शितमनौचित्यं प्रयोगसाधुत्वेन निराक्रियते विश्वेश्वरभट्टैः। एभिरुच्यते यत्सर्वत्र परसमवेतक्रियाजन्यफलशालित्वे एव कर्मत्वं द्वितीयाविभक्तिश्च भवेन्नास्त्येतादृशो नियमः। "आत्मानं वेद, आत्मानमुपासीत, आत्मानं जानामी" त्यादिषु लौकिकवैदिकप्रयोगेषु परसमवेतक्रियाजन्यफलशालित्वाभावेऽपि द्वितीयाविभक्तेर्दर्शनादेतादृशस्थलेष्वपि प्रयोगसाधुत्वं वर्तत एव।[34] एवञ्चाऽहंवित्तेरप्युपपद्यते साधनत्वम् आत्मनः परिज्ञानस्य।

आत्मनो विभुत्वम्

आत्मनः परिमाणविषयेऽपि परस्परं विवदन्ते विविधविचारधारावन्तो

विचक्षणाः। अणुमध्यमविभुत्वाख्यानि त्रिविधानि परिमाणानि दर्शनपरिसरे प्रसिद्धानि। एतेष्वात्मनोऽणुपरिमाणं प्रतिपाद्यते रामानुजाचार्येण।[35] आत्मनस्सावयवत्वं सञ्कोचविकासशालित्वञ्चाङ्गीकृत्य जैनशासनरतैर्दिगम्बरैरस्य देहपरिमाणवत्वमङ्गीक्रियते।[36] भाट्टचिन्तनेऽस्मिन्सन्दर्भे तार्किककाणाद-प्राभाकरैस्सह मतैक्यमवलोक्यते। एतेषामनुरूपं भाट्टैरप्यात्मनोऽङ्गीक्रियते विभुत्वाऽपरपर्यायं सर्वव्यापकत्वम्। अत्रोच्यते भट्टपादैर्यदात्मनोऽणुपरिमाणपक्षे येषु प्रदेशेष्वात्मनः स्थितिस्तत्रैव सुखदुःखादीनामुपलब्धावेकस्मिन् क्षणे शिरः पादयोर्वेदनानुभूतेरसङ्गतिः स्यात्। अथ च शिरःपादवेदनयोरयौगपद्या-दप्यतिशैघ्र्यादात्मनो यौगपद्याभिमानोपपद्यत इति चेदत्रोच्यते भट्टवर्यैर्यदात्मन-श्शीघ्रगामित्वादेकस्मिंस्थानेऽवस्थानमेव नास्ति तस्मादस्योपलब्धिकालस्याप्येकत्र भानाभावादस्यां कल्पनायां विनिगमनाविरहान्नास्त्यौचित्यम्।[37]

दिगम्बराणामनुरूपं शरीरपरिमाणवत्वमङ्गीक्रियते चेदस्यामवस्थायामात्मनः सावयवत्वं स्यात्। सावयवत्वेऽप्यस्य यथाकथञ्चिन्नित्यत्वं प्रतिपादनीयं भवेदेवमेव बह्ववयवकल्पना करणीया भवेदत्रापि पुत्तिकाहस्तिदेहेष्वात्मनस्सङ्गतयेऽ-स्यातिसङ्कोचविस्तारकल्पनाऽपि करणीयास्यादत एवास्मिन्देहपरिमाणाङ्गीका-रेऽनेकानां कल्पनानामावश्यकत्वादस्य कल्पनागौरवदोषग्रस्तत्वादात्मनो विभुपरिमाणस्यैवौचित्यमङ्गीक्रियते भट्टपादैः।[38]

आत्मनो विभुत्वसिद्धये प्रदीयते अयमपि तर्को भट्टवर्यैर्यदात्मनस्सर्वग-तत्वाभावे शरीरस्य एकस्मात्स्थानादन्यत्र गमने तद्गताकाशो यथा तत्रैव परित्यक्तो भवति तथैवात्माऽपि परित्यक्तस्स्यात्। तस्य प्रेरकाभावादनुगमनमपि न सिद्ध्यति। ज्वालादीनां स्पर्शवत्वानां वाय्वादिभिर्यथोपपद्यतेऽनुगमनार्थं प्रेरणं तथात्मनोऽस्पर्शवत्वादेतादृशं परप्रेरणमपि नोपपद्यते। एवञ्च स्वातन्त्र्येण परप्रेरितेन वाऽत्मनश्शरीरानुगमनाभावे गच्छति शरीरे तस्यात्मनः परित्यागादस्यां स्थितौ शरीरस्याचेतनत्वापत्तिस्यादत एवात्मनो विभुत्वे एवौचित्यमङ्गीकुर्वद्भिरुच्यते भट्टपादैर्यदात्मनो व्यापकत्वे गगनवदात्मनोऽपि सर्वत्रानुस्यूतेरुपपद्यते गमनक्रिया वतो- ऽपि शरीरस्य चैतन्यानुवृत्तिः।[39]

नन्वात्मनः व्यापकत्वे सर्वेषामात्मनां सर्वेष्वपि शरीरेष्ववस्थानात्महद्वैषम्यं भवेदिति चेन्मैवम्। मूर्तानामेव पदार्थानामेकत्रावस्थाने जायते विरोधः। अमूर्तानामात्मनामेकत्रावस्थानेऽमूर्तानां कालदिग्गगनानामेकत्रावस्थानवन्नास्ति किमपि वैषम्यम्।[40]

एवमेवात्मनस्सर्वव्यापकत्वाद्यत्र देहो नास्ति तत्राप्यात्मगुणानामुपलब्धि-प्रसङ्गस्यादिति चेदत्रात्मनस्सर्वव्यापकत्वे भाट्टैस्सह साम्यमवाप्नुवद्भिश्शालिकनाथ-मिश्रैरुच्यते यदात्मगुणानामुपलब्धावात्ममनस्सन्निकर्षस्यासमवायिकारणत्वात् मनसश्च देहमात्रेऽवस्थानात् देहभिन्नप्रदेशेऽस्यात्ममनस्सन्निकर्षात्मकस्या-समवायिकारणस्याभावन्नास्त्यात्मगुणानान्तत्रोपलब्धिप्रसङ्गः।[41]

नन्वात्मनो व्यापकत्वात्सर्वत्रैकात्मैवास्तु इति चेदत्र प्रतिशरीरे धर्माधर्मसुखदुः-खादिव्यवस्थादर्शनस्य तर्केणास्य पक्षस्य क्रियते निराकरणं शालिकनाथमिश्रैः।[42]

पार्थसारथिभिस्तावदत्रोच्यते यदेकात्मवादाङ्गीकारे यथा नेत्रेणालोकितस्यार्थस्य मनसा त्वचा च कतुरिकत्वादृग्रहणं सङ्गच्छते, तथैव, सर्वशरीरेष्वेकात्मवादाङ्गीकारे देवदत्तेन दृष्टस्यार्थस्य यज्ञदत्तद्वारा स्मरणमापद्येत अत एवात्मनः प्रतिशरीर-भिन्नत्वाङ्गी-कारे एवौचित्यमाचक्षते मिश्रवर्यैः।[43]

कर्तृत्वभोक्तृत्वाङ्गीकारेऽनेकान्तवादोपन्यासः

भाट्टविचारवीथिकायामात्मनः नित्यत्वव्यापकत्वज्ञानसुखादीनामाश्र-यत्ववत्कर्तृत्वभोक्तृत्वयोरप्यङ्गीकारः क्रियते। अत्रोच्यते भट्टपादैर्यत्सर्वत्र व्यापकत्वादात्मनि संयोगविभागयोरशक्यत्वाद्वैशेषिकाभिमता परिस्पन्दात्मिका क्रिया न सम्भवति, अत एव यद्यप्यात्मनि स्पन्दात्मिकाक्रियानिरूपितं कर्तृत्वं नोपपद्यते, तथापि धात्वर्थमात्रस्य क्रियात्वेनाङ्गीकाराज्जानाम्यहं, सत्तावानहं, सङ्कल्पवानहमित्यादिषु ज्ञानसत्तासङ्कल्पादिनिरूपितमुपपद्यते कर्तृत्वमात्मनः। यथोक्तं वार्तिके-

'क्रिया धात्वर्थमात्रस्यादन्याधारेऽपि कर्तृता।'[44]

पार्थसारथिमिश्रैरपि शास्त्रदीपिकायां प्रतिपाद्यते यन्न केवलमुत्क्षेपणादीनां स्पन्दात्मिकानां क्रियात्वादाभिर्निरूपितमेव कर्तृत्वमपितु धात्वर्थमात्रस्य क्रियात्वात् यागज्ञानप्रयत्नसङ्कल्पादिभिर्निरूपितं कर्तृत्वमात्मनः सर्वगतत्वेऽपि तस्मिन् साक्षादुपपद्यते।[45]

एवमेव एतदप्युच्यते भाट्टैर्यत्सर्वत्र यत्समवेता क्रिया विद्यते तस्यैव कर्तृत्वं स्यादिति नास्ति नियमः।[46] परक्रियाप्रयोजकत्वेनाप्युपपद्यत एव कर्तृत्वम्। भूतेषु यावलोक्यते स्पन्दात्मिकाक्रिया, साऽप्यात्माधिष्ठितेष्वेव भूतेषु दृश्यते। आत्मनो विरहे भूतेषु सत्स्वपि मृते शरीरे परिस्पन्दस्याभावादात्मनः भूतानां शरीरस्य च प्रयोजकत्वेन स्पन्दक्रियानिरूपितं कर्तृत्वमपि साध्यते भाट्टैः।[47]

अत्रात्मनि कर्तृत्वभोक्तृत्वाभ्यां विकारवत्वादनित्यत्वमाक्षिप्यते चेदत्र विकारमात्रेण कस्यचिदनित्यत्वं नैवाङ्गीक्रियते भाट्टैः। एतेषां मते यथा बालयुवावस्थयोः पूर्वमवलोकितस्य देवदत्तस्य वर्तमानकाले स्थविरावस्थायां विद्यमानेऽपि तस्य कृते सोऽयं देवदत्त इति जायते प्रत्यभिज्ञा, तथैव ज्ञान-सुखादिभिर्विकारैः परिणामिनोऽप्यात्मनः स्थैर्यमुपपद्यते।[48]

एवं कटककुण्डलादिभिराकारैः परस्परभिन्नेषु रूपेषु परिणतस्यापि सुवर्णस्य सुवर्णत्वेनैकत्वमङ्गीक्रियते तथैवात्मन्यपि ज्ञानेच्छासुखदुःखादिभिः परिणामजन्यस्य विकारस्य विद्यमानत्वेऽपि स्थैर्यत्वमङ्गीकृत्य भाट्टैरुभयोः विकारस्थिरत्वयोरेकत्र स्वीकारादाश्रियतेऽत्रानेकान्तवादः।[49] न्यायरत्नाकरव्याख्यायां अन्यानन्यविकल्पश्च सर्वत्रानेकान्तवादाश्रयणेन परिहर्त्तव्येत्यनया पङ्क्त्या पार्थसारथिमिश्रैरप्यात्मनि समर्थ्य-तेऽयं परिणामित्वेऽपि स्थैर्यत्वाङ्गीकारघटितोऽनेकान्तवाद[50] इति दिक्।

आत्मनश्चैतन्यमचैतन्यञ्च

यद्यपि भाट्टविचारधारायामात्मनश्शरीरेन्द्रियमनोभ्यः पार्थक्यमन्यवादि-सम्मतं तथाप्यात्मनि यच्चैतन्यमनुभूयते तदात्मनः स्वरूपं तद्भिन्नं वेत्यपि विचारणीयम्। चैतन्यमत्रात्मनः स्वरूपमभिमतङ्कापिले तन्त्रे।[51] औलुक्यमता-वलम्बिनस्तर्करसिकाअक्षपादानुयायिनश्च जडत्वमेवात्मनस्स्वरूपं मन्वते।[52]

आत्मचैतन्यम्

भाट्टतन्त्रे चैतन्यवदचैतन्यमप्यात्मनः स्वरूपमभिमतं प्रतीयते।

सुखदुःखाद्यवस्थाश्च गच्छन्नपि नरो मम।
चैतन्यद्रव्यसत्तादिरूपं नैव विमुञ्चति।।"[53]

इत्यनया वार्तिकोक्त्या स्पष्टं प्रतीयते यदत्र चैतन्यादिकमात्मस्वरूपेणैवाभिमतं भट्टवर्याणाम्। एवमेव तन्त्रवार्तिकस्य द्वितीयाध्यायस्य प्रथमे पादेऽपूर्वाधिकरणे "अहं प्रत्ययेन हि चैतन्यस्वभावस्यात्मनोऽस्तित्वमात्रमवगम्यत"[54] इत्यत्र "तदपेक्षयैव च चैतन्यात्मकत्वाद्यविभागाच्चोपनिषत्स्वैकात्मव्यवहार[55]" इत्यत्रापि चात्मनश्चैतन्यात्मकत्वमेव प्रतिपादितं लक्ष्यते।

भाट्टदृष्ट्या तत्त्वानां प्रतिपादनधुरं वहद्भिः पार्थसारथिमिश्रैरपि "भूतेन्द्रियविज्ञानानामसञ्ज्ञित्वमचैतन्यम्, अन्यस्तु तेभ्यो नित्यश्चेतन" इत्यत्र

न्यायरत्नाकरे[56] "तस्मादन्यश्चेतन"[57] इत्यनेन वचनांशेन शास्त्रदीपिकायामपि चैतन्यात्मकत्वमेवात्मनः प्रतिपादितमित्येव जायते प्रतिपत्तिः।

चैतन्यत्वमचैतन्यत्वञ्च

उक्तैस्सन्दर्भैर्यद्यप्यात्मनश्चैतन्यं प्रतीयते तथापि नैतच्चैतन्यं साङ्ख्यशास्त्रे प्रतिपादितेन चैतन्येनाभिन्नमपितु विलक्षणमेवेति मन्ये।

साङ्ख्ये प्रतिपादितस्य चैतन्यस्य बुद्धिपरिणामेन ज्ञानेन सह स्पष्टमेव पार्थक्यमुपलभ्यते[58] परन्तु यथा न्यायवैशेषिकसिद्धान्तयोर्गुणपदार्थेषु पृथक्तया गणनाया अभावाच्चैतन्यस्य ज्ञानात्मकत्वं मन्यते विद्वद्भिस्तथैव भाट्टतन्त्रेऽपि चैतन्येन सह कर्तृत्वभोक्तृत्वयोरप्युपादानात्साङ्ख्यवदात्मनश्चैतन्यमात्रस्वरूपस्यानङ्गीकाराच्च प्रतिभाति यदत्रात्मनश्चैतन्यं साङ्ख्यविलक्षणं ज्ञानात्मकमेवाभिमतमिति।

नच चैतन्यस्य ज्ञानात्मकत्वे भाट्टविचारवीथिकायामद्वैतवादिसम्मतस्यात्मनो ज्ञानात्मकत्वाभावादात्मनश्चैतन्यस्वरूपबोधकानामुक्तसन्दर्भानामसङ्गतिरिति वाच्यम्। ज्ञानस्यात्मनिष्ठत्वेन ज्ञानशक्तिस्वभावत्वेन च प्रतिपादनादुक्तसन्दर्भाणां सङ्गतेरुपपन्नत्वात्।[59]

"ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान्"[60] इत्यनेन वार्तिकेन भट्टवर्यैः "अविनाशी स्वरूपेण पुरुषो यातु नाशिता।

मात्राणां साऽधिकाराणां भूतादीनामसञ्ज्ञिता।।"[61] इत्यस्य वार्त्तिकस्य व्याख्याप्रसङ्गे" विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीमं मन्त्रं विवृण्वद्भिः पार्थसारथिमिश्रवर्यैरपि न्यायरत्नाकरे "एतदुक्तं भवति-'विज्ञानघन' इति ज्ञानशक्तिस्वभावस्यात्मनोऽभिधानम्, न ज्ञानमात्रस्येत्यनेनांशेना"त्र[62] शास्त्रदीपिकियामपि "नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत' इति वाक्यं ज्ञानशक्त्यभिप्रायमि[63]त्यङ्गीकुर्वद्भिरात्मनो ज्ञानशक्तिस्वभावात्मकाभिन्नं ज्ञानशक्तिवैशिष्ट्यं प्रकाशितम्।

उक्तदिशा चैतन्यात्मकस्य ज्ञानस्य ज्ञानशक्त्यात्मनात्मना सह सम्बन्ध-विधानाच्छक्तेश्चात्मनि भेदाऽभेदेन तादात्म्येनैव सम्बन्धेन विद्यमानत्वाच्चैत-न्यात्मकस्य ज्ञानस्यात्मना सह भिन्नाऽभिन्ना प्रतीतिरुपपद्यते।

नात्र भाट्टप्रघट्टेऽस्मिश्चैतन्यात्मकस्य ज्ञानस्यात्मस्वरूपत्वमङ्गीक्रियतेऽपितु नित्यज्ञानशक्तिवैशिष्ट्यमेव। अस्मादेव कारणादनुकूलासु स्थितिषु शरीरेन्द्रियविषयेषु सत्स्वात्मन्युत्पन्नं ज्ञानात्मकं चैतन्यमात्मनः स्वभावत्वेन शक्यतेऽङ्गीकर्तुम्।

प्रतिकूलावस्थायां यत्र शरीरेन्द्रियषियाणां नास्ति सद्भावस्तस्यामवस्थायां यथा सुषुप्तौ मुक्तौ वा नाङ्गीक्रियते ज्ञानात्मकस्य चैतन्यस्यास्तित्त्वम् "भूतादीनामसञ्ज्ञिता"[64] इत्यनेन वार्तिकांशेन भाट्टप्रघट्टस्थापकैः कुमारिलैर्निराकृतं सुषुप्तौ मुक्तात्मनि वा ज्ञानात्मकं चैतन्यम्।

एवञ्च कटककुण्डलादिभिः परिणामिनोऽपि सुवर्णस्य स्थैर्यवज्ज्ञानेच्छा-सुखदुःखादिभिः परिणामिनोऽप्यात्मनस्स्थैर्याङ्गीकारेणोभयनिरूपितत्वादात्मस्वरूप-विषयेऽङ्गीक्रियतेऽनेकान्तवादस्तथैव ज्ञानाज्ञानलक्षणयोश्चैतन्याचैतन्ययोरुभ-योरप्यात्मरूपेण स्वीकारादत्रापि कश्चन विलक्षणोऽनेकान्तवाद एवोपपद्यते।

मन्ये अनया एव विधया जडबोधात्मकमात्मनस्स्वरूपमङ्गीकृतं भाट्टैरिति प्रतिपाद्यते हिरयन्नाराधाकृष्णन्बलदेवेपाध्यायादिभिर्विद्वद्भिरित्यलम्।

सन्दर्भ

1. 'विभुत्वं परममहत्परिमाणवत्वम्'- न्यायसिद्धान्तमुक्तावली किरणावलीसमन्विता, पृष्ठ सङ्ख्या 180, चौखम्बा संस्कृतसंस्थानं वाराणसी, 1983
2. भारतीय दर्शन की रूपरेखा, पृष्ठ सङ्ख्या 229, राजकमल प्रकाशन, पटना, 1987
3. "स च मानसप्रत्यक्षः" तर्कभाषा, पृष्ठ सङ्ख्या 144, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 1982
4. न्यायसिद्धान्तमुक्तावली-किरणावली व्याख्या, पृष्ठ सङ्ख्या 180, पङ्क्तिः 15, चौखम्बा- संस्कृतसंस्थानम्, वाराणसी, 1983
5. "तत्रात्मामश्चाप्रत्यक्षे"-वैशेषिकसूत्रम् 8/1/2
6. "प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गनि।"-वैशेषिक सूत्रम् 3/2/4
7. अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम्। साङ्ख्यकारिका-23
8. न्यायकोशः, पृष्ठ सङ्ख्या 296, पङ्क्ति 8
9. भारतीय दर्शन की रूपरेखा, पृष्ठ 402-403, एम० हिरयन्ना, राजकमल प्रकाशन, दिल्ली, 1987
10. भारतीय दर्शन, पृष्ठ सङ्ख्या 400, डॉ० उमेशमिश्रा, हिन्दी समिति, उत्तरप्रदेश लखनऊ, 1975
11. वही, पृ० सं० 421, वही हिन्दी समिति, उत्तरप्रदेश
12. वही, पृ० सं० 430-431 वही, हिन्दी समिति उत्तरप्रदेश
13. भारतीय दर्शन, पृष्ठ सङ्ख्या 758, डॉ० राधा कृष्णन्, राजपाल एण्ड सन्स दिल्ली-1969

14. भारतीय दर्शन, पृष्ठ सङ्ख्या 384-385, डॉ० उमेशमिश्र, हिन्दी समिति, उ० प्र०, लखनऊ 1975
15. भारतीय दर्शन की रूपरेखा, पृ० सङ्ख्या 158, डॉ० एम० हिरयन्ना, राजकमल प्रकाशन, दिल्ली-1987
16. 'न्यायकोशः' पृष्ठ सङ्ख्या 296, निर्णयसागर मुद्रणालयः, मुम्बई-1928
17. श्लोकवार्तिकम्-प्रतिज्ञासूत्रम्, सूत्रसङ्ख्या 1/1/1
18. शतपथ ब्रह्मणम्-2/6/4/17
19. तन्त्रवार्तिकम्, द्वितीयो भागः, पृष्ठसङ्ख्या 36, गङ्गानाथझा केन्द्रीयसंस्कृतपीठम्, प्रयागः, 1990
20. श्लोकवार्तिकम् पृष्ठसङ्ख्या 474, तारा पब्लिकेशन्स, वाराणसी 1978
21. जैमिनिसूत्रम्, 1/1/4
22. 'बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः'। -प्रकारण पञ्चिका, पृ० 316
23. तस्माच्छरीरादन्यस्य गुणो ज्ञानमिति-" 327
24. प्रकरणपञ्चिका व्याख्या पृष्ठ सङ्ख्या-167 पङ्क्तिः 20, तः 168, प्रकरणपञ्चिका, बी०एच०यू०वाराणसी, 1961
25. श्लोकवार्त्तिकम्, पृष्ठ सङ्ख्या-489
26. शास्त्रदीपिका पृष्ठ सङ्ख्या-119, पङ्क्तिः 15, कृष्णदास अकादमी-वाराणसी, 1988
27. "कथमिन्द्रियभेदः? इन्द्रियाभावेऽपि ज्ञातुरेकस्य प्रत्यभिज्ञानात् योऽहं रूप-मद्राक्षं सोऽहं स्पृशामीति योऽहमग्रहीषं सोऽहं स्मरामीति।"
शास्त्रदीपिका पृष्ठ सङ्ख्या-123, पङ्क्तिः 24
28. मनस्तु प्रत्यक्षसिद्धस्य ज्ञातुः रूपादिज्ञानेषु व्यतिरिक्तकरणाधीनत्वात् सुखादिज्ञानेषु भवितव्यं करणेनेत्येवं कल्प्यत इति नास्य ज्ञातृत्वमाशङ्कनीयम्। शास्त्रदीपिका पृष्ठ सङ्ख्या-123 पङ्क्तिः 24
29. भारतीयदर्शनम् पृष्ठ सङ्ख्या-403, डॉ० राधाकृष्णन्
30. शास्त्रदीपिका पृष्ठ सङ्ख्या-122, पङ्क्तिः 19
31. शास्त्रदीपिका पृष्ठ सङ्ख्या-122, पङ्क्तिः11 तः 16 पर्यन्तम्।
32. "स्वात्मान क्रियाविरोधस्य दूषकताबीजभावेनादूषकत्वात्।"
भाट्टचिन्तामणिः पृष्ठ सङ्ख्या-41 पङ्क्तिः 23, चौखम्बा संस्कृत-सीरीज-ऑफिस, 1933
33. "न च परसमवेतक्रियाजन्यफलभागित्वस्य कर्मत्वतया कर्मसञ्ज्ञायास्तद् विभक्तेश्चासाधुतापत्तिर्दूषकताबीजमिति वाच्यम्। भाट्टचिन्तामणि, पृ०-41 पङ्क्तिः 24
"परसमवेत-क्रिया-फलशालिकर्मेति कर्मज्ञाः। अतो न मानसप्रत्यक्षः।

'तन्त्ररहस्यम्' पृष्ठ-21 पङ्क्तिः 2 तः 3 पर्यन्तम्।
बड़ौदा सेन्ट्रल लाइब्रेरी-प्रकाशन, बड़ौदा, 1923

34. "तादृशकर्मत्वाभावेपि तद्विभक्तेः। आत्मा ज्ञातव्य, आत्मानं वेद, आत्मान गुणासीत' इत्यादि लौकिकवैदिकप्रयोगेणैव साधुत्वात्।"
भाट्टचिन्तामणिः, पृष्ठ सङ्ख्या-41, पङ्क्ति 25 तः 27 पर्यन्तम्।
35. "अणुपरिमाणो नानाविधश्च जीव इति रामानुजीयमाध्वादयो वैष्णवाः।'' न्यायकोशः पृ०सं०297
36. एम०एम०हिरयन्ना, भारतीयदर्शन की रूपरेखा, पृष्ठ सङ्ख्या-159, पङ्क्तिः 12
"तत्रापि देहपरिमाणरूपो जीव इत्यार्हताः।" न्यायकोशः पृ०सं०-297
37. कुमारिलः, तन्त्रवार्त्तिकम् पृ०सं०-56
''पार्थसारथिमिश्राः, शास्त्रदीपिका, पृष्ठ सङ्ख्या-124, पङ्क्तिः 14
38. कुमारिलः, तन्त्रवार्त्तिकम् पृष्ठ सङ्ख्या-57 पार्थसारथिमिश्राः, शास्त्रदीपिका पृ०-124, पं० 17
39. वही, पृष्ठ सङ्ख्या-56 पङ्क्तिः 01
"सर्वगतत्वे तु यत्र यत्र गम्यते तत्र तत्रात्मानुस्यूतिरस्तीति युक्ता चैतन्यानुवृत्तिः।"
कुमारिलः, तन्त्रवार्त्तिकम्, पृ०सं०-56 पङ्क्ति 5
40. "सर्वेषामपि च सर्वगतत्वे मूर्तिरहितत्वात्समानदेशवृत्यविरोधः।''
कुमारिलः, तन्त्रवार्त्तिकम्, पृ०सङ्ख्या 58 पङ्क्ति 16
41. शालिकनाथमिश्राः, प्रकरणपञ्चिका, पृष्ठ सङ्ख्या-344
42. शालिकनाथमिश्राः, प्रकरणपञ्चिका, पृष्ठ सङ्ख्या-345 पङ्क्ति 13
43. पार्थसारथिमिश्रः शास्त्रदीपिका, पृष्ठ सङ्ख्या-124, पङ्क्तिः 22
44. कुमारिलः, श्लोकवार्तिकम् पृष्ठ सङ्ख्या-501 आत्मवादे वार्तिक सङ्ख्या, 75
45. पार्थसारथिमिश्रः, शास्त्रदीपिका, पृष्ठ सङ्ख्या-119 पङ्क्तिः 11
46. कुमारिलः, श्लोकवार्तिकम्, आत्मवादः न च स्वसमवेतैव कर्तृभिः क्रियते क्रिया। श्लो० 75, 501
47. "योऽपि भूतपरिस्पन्दस्तत्राधिष्ठानतो भवेत्। 76
तद्देशप्रवृत्तेश्च या या देहेन्द्रियैः क्रिया।
क्रियते पुरुषणैव सा सा सर्वा कृतोच्यते।। 77 श्लोकवार्तिकम् पृ०सं०-501
48. "नानित्यशब्दवाच्यत्वमात्मनो विनिवार्यते।
विक्रियामात्रवाचित्वे न ह्युच्छेदोऽस्य तावता।। श्लोकवार्तिकम् 22, पृष्ठ सङ्ख्या-492
49. "तस्मादुभयहानेन व्यावृत्त्यनुगमात्मकः।
पुरुषोऽभ्युपयगन्तव्यः कुण्डलादिषु स्वर्णवत्।।28 श्लोकवार्तिकम् 22, पृष्ठ संख्या-492

50. पार्थसारथिः श्लो०वा०व्याख्या न्यायरत्नाकर, श्लोकवार्तिकम् पृष्ठ संख्या-492 पङ्क्तिः 07
51. तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः। सां०का०सङ्ख्या-55
52. "अतो ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्। न्याय-सिद्धान्त-मुक्तावली पृष्ठ सङ्ख्या-169
किरणावली व्याख्या, चौखम्बा-संस्कृत-संस्थानम्, वाराणसी, तृतीयं संस्करणम्, 1983
53.
54. श्लोकवार्त्तिकम् आत्मवादः कारिकासङ्ख्या 26
55. अजितोपेतं तन्त्रवार्त्तिकम् पृष्ठ सङ्ख्या-53, एवं पृष्ठ सङ्ख्या-58, द्वितीयो भागः गङ्गानाथ-केन्द्रीय-संस्कृतविद्यापीठम्, प्रयागः 1990
56. वही,
57. श्लोकवार्त्तिकस्य न्यायरत्नाकरव्याख्या-श्लोकवार्त्तिकम् पृष्ठ सङ्ख्या-514 पङ्क्तिः 27, श्लोकवार्त्तिकम्, तारा पब्लिकेशन्स-वाराणसी, 1978
58. शास्त्रदीपिका, पृष्ठ सङ्ख्या-120, पङ्क्तिः 4, कृष्णदास-संस्कृतसीरीजसङ्ख्या-103, कृष्णदास-अकादमी, वाराणसी, 1988
59. अध्यवसायो बुद्धिधर्मोज्ञानं विराग ऐश्वर्यम्। साङ्ख्यकारिका सङ्ख्या-23
60. श्लोकवार्त्तिकम्, आत्मवादः श्लोक सङ्ख्या-73
61. श्लोकवार्त्तिकम् आत्मवादः श्लोक सङ्ख्या-1471
62. न्यायरत्नाकरव्याख्या-श्लोकवार्त्तिकम् पृष्ठ सङ्ख्या-514, पङ्क्तिः 19
63. शास्त्रदीपिका, पृष्ठ संख्या 127
64. भूतादीनामसंज्ञिता श्लोक वार्त्तिकम् पृष्ठ संख्या 514

7
पूर्वमीमांसकाणां मते मोक्षस्वरूपम्

भारतीयदर्शनशास्त्रस्य प्रायः सर्वेष्वपि प्रस्थानेषु परमपुरुषार्थत्वेन 'मोक्षस्य' प्रतिपादनं प्रामुख्येन विचिकित्सितं परिलक्ष्यते। नास्तिकास्तिकभेदयोर्वैदिकावैदिकभेदयोर्वा विभक्तेषु दर्शनभेदेषु स्वसिद्धान्तदृष्ट्या 'मोक्षस्य' विशदरूपेण प्रतिपादानार्थं सर्वेषां प्रकाशतेऽत्र महती प्रवृत्तिः।

दर्शनवीथिकायां विराजमानेषु चिन्तनप्रस्थानेषु स्वपदवाच्यस्यात्मनस्तद्भिन्नेभ्यः सकलेभ्यः पदार्थेभ्यस्सम्बन्धस्य राहित्यात्मकं मोक्षस्वरूपमभिमतं मन्ये। अनात्मपदार्थेभ्य आत्मनः सम्बन्धस्य राहित्यात्मकत्वेन मोक्षस्वरूपस्य सर्वेषामभिमतत्वेऽपि मोक्षस्यास्य साधनविषये परिलक्ष्यन्ते दार्शनिकानां परस्परभिन्ना दृष्टयः।

दार्शनिकप्रस्थानेषु मौलिभूतत्वेनाभिमतस्य मोक्षस्य बन्धराहित्यात्मकत्वात् बन्धस्य चालीकवास्तविकभेदेन द्विविधत्वात् मोक्षस्यापि वास्तविकावास्तविकत्वेन सुवचमेव वर्तते द्वैविध्यम्। नास्तिकवर्गे विद्वद्भिः स्थापितस्य बौद्धदर्शनस्य क्षणिकविज्ञानवादशून्यवादसम्प्रदाययोर्बन्धस्य संवृत्तिरूपतया अलीकत्वात् पारमार्थिक्यामवस्थायां मोक्षोऽप्यत्र अलीक एव इति शक्यते प्रतिपादयितुम्। एवमेवास्तिकवर्गेऽपि साङ्ख्ययोगवेदान्तदृष्ट्या बन्धस्यावास्तविकत्वमेव प्रतिपादितम्। साङ्ख्ये प्रकृत्या सह पुरुषसम्बन्धस्याविवेकग्रस्तत्वमेव स्थापितं परिलक्ष्यते सांख्यग्रन्थेषु। बन्धस्यात्रालीकत्वादेव विवेकज्ञानेन प्रतिपाद्यते निवृत्तिरस्माद्बन्धात् महामुनिना कपिलेन तत्त्वसमाससूत्रे-

एतत् सम्यगज्ञात्वा कृतकृत्यः स्यात्।
न पुनास्त्रिविधेन दुःखेनाभिभूयते।।[1] इति।

तथा च प्रसिद्धे साङ्ख्यदर्शनसूत्रे-

'विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यता नेतरान्नेतरात्'[2] इति।

साङ्ख्यवदयोगशास्त्रेऽपि "विवेकख्यातिरविप्लवा हानोपाय"[3] इत्यनेन सूत्रेणाभ्यासवैराग्यसहकृतस्य विवेकज्ञानस्यैव प्रदर्शितं परमर्षिणा पतञ्जलिना मोक्षहेतुत्वम्। साङ्ख्ययोगवद्वेदान्तेऽपि प्रातिभासिकव्यावहारिकपारमार्थिकीषु त्रिविधासु सत्तासु ब्रह्मसाक्षात्कारात्मिकां पारमार्थिकीं सत्तां विहायाविद्याकार्यभूतयोरुभयोरेव प्रातिभासिकव्यावहारिकसत्तयोरङ्गीक्रियते बन्धस्यावस्थितिः। अस्य बन्धस्यालीकत्वादेव 'दशमस्त्वमसीतिवत्तत्त्वमसी'[4] त्यादिभिर्बोधकवाक्यगम्यस्याधिकरणात्मकस्य ब्रह्मणो ज्ञानादेवाङ्गीक्रियते सिद्धस्यैव मोक्षस्यावाप्तिर्वेदान्तिभिः।

उक्तदिशा नास्तिकेषु दर्शनेषु क्षणिकविज्ञानवादशून्यवादाभ्यां सह वैदिकान्तर्गतानि साङ्ख्ययोगवेदान्तप्रस्थानानि विहायावैदिकेषु जैनदर्शनेन सह वैदिकान्तर्गतेषु न्यायवैशेषिकमीमांसादर्शनेषु बन्धस्य वास्तविकत्वान्मोक्षस्यापि वास्तविकत्वं परिलक्ष्यते।

मीमांसकानां मते मोक्षस्वरूपम्

वेदार्थनिर्णयार्थं प्रवृत्तायां मीमांसायां सर्वेषां वैदिकवाक्यानां कर्मण्येव तात्पर्य-प्रतिपादनादियं मीमांसा कर्ममीमांसा इत्यनयाऽपि सञ्ज्ञया विद्वत्समवाये प्रथिता। यद्यपि मीमांसाशब्देनोपनिषद्वाक्यानामर्थनिर्णयार्थं प्रवृत्तायाः वेदान्तापरसञ्ज्ञिकाया उत्तरमीमांसाया अपि जायते बोधस्तथापि मीमांसाशब्दमात्रेण कर्ममीमांसाया एव झटिति बोधात् कर्मप्रतिपादक एव शास्त्रे रूढोऽयं मीमांसा-शब्दः। अस्य मीमांसाशास्त्रस्य कर्मपरत्वात् शास्त्रप्रवर्तके जैमिनि-विरचिते सूत्रग्रन्थे सूत्रार्थवैशद्यात्मके च 'शाबरभाष्ये' नास्ति कोऽप्युल्लेखोऽस्यात्मनः स्वरूपावस्थानरूपस्य देहेन्द्रियकर्मफलादिसम्बन्धरहितस्य मोक्षस्य।

प्रभाकरसम्प्रदाये मोक्षस्वरूपम्

मीमांसाशास्त्रे सूत्रभाष्यग्रन्थवद्यद्यपि गुरोः प्रभाकरस्यापि नोपलभ्यते मोक्षविषयकं साक्षादभिमतं किञ्चित्तथापि प्रभाकरमतावलम्बिना शालिकनाथेन प्रकरणपञ्चिकायां विशदीकृतमेतन्मोक्षस्वरूपम्। साक्षाद्रीत्या प्रभाकरस्यात्र प्रतिपादनाभावेऽपि शालिकनाथस्य प्रभाकरमतपक्षपातित्वात्प्रकरणपञ्चिकायामालोकितं मोक्षस्वरूपं प्रभाकराभिमतमित्यङ्गीकारेऽपि न प्रतीयते काऽपि विप्रतिपत्तिः।

प्रकरणपञ्चिकायां शालिकनाथेन "आत्यन्तिकस्तु देहोच्छेदो निश्शेष धर्माधर्मपरिक्षयनिबन्धनो मोक्ष इति युक्तमि"[5]त्यनया पङ्क्त्या प्राप्तशरीरस्य

धर्माधर्मयोः पूर्णविनाशादात्यन्तिकोच्छेदत्वेन प्रकाशितं मोक्षस्वरूपम्। स्वविरचितस्य मोक्षस्वरूपस्य वैशद्यार्थमेभिः कृतं विवेचनं चरणत्रयेण पल्लवितुं शक्यतेः-

1. धर्माधर्मजन्यफलोपभोगायैव जायते शरीरेण सहात्मनः सम्बन्धरूपो बन्ध अत एव धर्माधर्मयोरेव वर्तते बन्धस्य हेतुत्वम्।
2. धर्माधर्मयोरेवात्मनश्शरीरसम्बन्धात्मकस्य बन्धस्य हेतुत्वाद्-द्वयोरेतयोर्विनाशाज्जन्मकारणस्याभावादात्मनो जन्ममूलत्वेन सञ्जातस्य शरीरेन्द्रियसम्बन्धस्य साध्यते परिसमाप्तिः।
3. आत्मनः शरीरमनसेन्द्रियसम्बन्धस्य सुखदुःखहेतुत्वादस्य परिक्षयादेव समस्तसुखदुःखात्मकस्य प्रपञ्चात्मकस्य बन्धस्य या परिसमाप्तिः सा एवैतेषामभिमता वर्तते मुक्तिः-

"धर्माधर्मवशीकृतो हि जीवस्तासु तासु योनिषु संसरति। स तयोरेकान्तोच्छेदे व्यपगतदेहेन्द्रियसम्बन्धस्समुत्खातनिखिलसांसारिकदुःखानुबन्धो मुक्त इत्युच्यते।"[6]

प्रभाकरमतावलम्बिनः शालिकनाथस्याभिमतं मोक्षस्वरूपं प्राच्यप्रतीच्योभयविद्यानदीष्णैराचार्यवर्यैः डॉ०-गङ्गानाथ-झा-महाभागैः 'पूर्वमीमांसा-इन-इट्स-सोर्सेस-सञ्ज्ञके स्वविरचिते ग्रन्थे चतुश्चरणेषु विशदीकृतम्ः-

1. भूमौ स्वकीये जीवने दुःखानामनुभवात् प्रथमं तावदुत्पद्यते दुःख-विषयिणी वितृष्णा।
2. यद्यपि प्राथमिके चरणे सुखेषु वितृष्णा नोत्पद्यते परन्तु चिन्तनपरम्परायां समारूढेऽस्यां व्यक्तौ सर्वेषां सुखानामवश्यमेव दुःखोत्पादकत्वमस्तीति समुत्पद्यतेऽनुभूतिः। अनयाऽनुभूत्या एव निखिलस्य प्रपञ्चस्य दुःखात्मकत्वानुभवादस्माज्जायते विरक्तिः। दुःखात्मकप्रपञ्चान्तर्गतानां सुखानामपि दुःखमिश्रितत्वेन सह दुःखोत्पादकत्वानुभवादाभ्यां सुखदुःखाभ्यां विरहितात्मकं मोक्षमवाप्तुम् एभ्यस्सुखेभ्योऽपि समुत्पद्यते विरक्तिः।
3. विरक्तस्तावन्मोक्षाय कास्यनिषिद्धकर्मवर्जनपुरस्सरं भोगेन प्रारब्धकर्मजन्यदुःखप्रणाशाय प्रवर्तते।
4. उक्तदिशा काम्यनिषिद्धकर्मपरित्यागात्तज्जन्यानां दुःखानामनुत्पादेऽपि सञ्चितकर्मराशेरनन्तत्वादस्या विनाशाय यदा मुमुक्षुः शमदमब्रह्मचर्यादीनां साधनानामवलम्बनेन सहात्मज्ञानमप्यवलम्बते तदा बन्धहेतुभूतानां कर्मणां त्यागान्नित्यकर्मणामनुष्ठानसहकृतेनात्मज्ञानेन शरीरेन्द्रियादिभ्यः सम्बन्धस्य विनाशादात्मनः मोक्षमधिगच्छति।[7]

रामानुजाचार्याभिमतं मोक्षस्वरूपम्

प्रकरणपञ्चिकाकर्तुः पृष्ठवर्तिभिर्धर्मपुरीवास्तव्यैः रामानुजाचार्यैः 'मोक्षोऽपि सकलदुःखोच्छेदरूपतया विलक्षणः पुरुषार्थ'[8] इत्यनया पङ्क्त्या निखिलदुःख-विनाशात्मकं मोक्षस्वरूपं संसाध्य "तत्प्राप्तिस्तु 'आत्मा वाऽरे द्रष्टव्य[9]' श्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः,[10]' तरति शोकमात्मविदि[11]त्यादिश्रुतिविहितादात्म-ज्ञानादित्यनया पङ्क्त्या ज्ञानमात्रस्य मोक्षहेतुत्वं प्रतिपादितम्।[12]

भाट्टमीमांसायां मोक्षस्य द्वैविध्यम्

मीमांसायाः कुमारिलभट्टप्रवर्तितायां शाखायां मोक्षस्वरूपस्य यत्र कैश्चित्सुखदुःखाभावत्वमङ्गीक्रियते तत्रैव केचिभाट्टमतावलम्बिभिर्मीमांसकैरस्य मोक्षस्यानन्दात्मकत्वमपि प्रतिपाद्यते। सुखदुःखाभावत्वेन मोक्षमङ्गीकुर्वत्सु मीमांसकेषु भट्टपादैस्सह पार्थसारथिविश्वेश्वरभट्टप्रभृतयो विशेषेणोल्लेखनीयाः सन्ति। आनन्दरूपतावादे चिदानन्दनारायणपण्डितकमलाकरभट्टकाण्व-शङ्करशुक्लादीनां सुतरां विराजन्तेऽभिमतानि।

मोक्षस्याभावात्मकत्वे कौमारिलं मतम्

भाट्टमीमांसायामपि शरीरेण सहात्मनस्सम्बन्धस्य बन्धत्वमङ्गीकृत्य तदभावस्यात्मनस्स्वातन्त्र्यात्मकत्वेनाभिमतं मोक्षस्वरूपम्। भोगायतनं तावच्छरीरं वर्तते। मनस इन्द्रियाणाञ्चाभिमतं भोगसाधनत्वं, शब्दस्पर्शादीनां विषयाणां भोग्यत्वञ्च सर्वेष्वपि दार्शनिकप्रस्थानेषु प्रायः निरूपितं संलक्ष्यते। एभिश्शरीरेन्द्रिय-विषयैर्यदात्मना सह जायते सम्बन्धस्तदास्य प्रपञ्चसम्बन्धस्य बन्धत्वमुररीक्रियते मीमांसकैरपि। अस्मात्सम्बन्धादात्मनो विरह एव वर्तते भाट्टभिमतो मोक्षः।

भाट्टप्रस्थानप्रवर्तकाः कुमारिलभट्टपादाः मोक्षस्य सुखरूपत्वं नाङ्गीकुर्वन्ति। एतेषां दृष्ट्याभावात्मकत्वेनैवाभिमतं मोक्षस्वरूपम्। अत्रानन्दात्मकत्वेनाभिमतं मोक्षस्वरूपमिति चेत् तदाऽस्य स्वर्गरूपत्वमेव स्यात्। तदात्वे स्वर्गस्य कर्मजन्यत्वादस्य मोक्षस्याप्यनित्यत्वमेवापतितं स्यादित्युपन्यस्तं भट्टपादैस्तद्यथा वार्तिके–

सुखोपभोगरूपश्च यदि मोक्षः प्रकल्प्यते।
स्वर्ग एव भवेदेष पर्यायेण क्षयी च सः।।[13] इति।

अस्य मोक्षस्य सुखात्मकत्वाङ्गीकारे कर्मजन्यत्वं कर्मजन्यत्वाच्चास्यानित्यत्वमेव स्यात्। यतो हि कर्मकारणस्य भावपदार्थस्य नोपपद्यते नित्यत्वमत एवात्र मोक्षत्वं न सुखरूपत्वमपितु शरीरादिभ्यस्सम्बन्धाभावत्वमेवास्योपपद्यते स्वरूपम्। भाट्टपादैरत्र निष्पन्नस्य देहस्य प्रध्वंसाभावत्वेनानुत्पन्नानां शरीराणां प्रागभावत्वेन च मोक्षत्वं प्रतिपाद्य बन्धस्य कर्मजन्यत्वात्कर्मक्षयस्यैव मोक्षहेतुत्वमुपन्यस्यते वार्तिके -

न हि कारणवत् किञ्चिदक्षयित्वेन गम्यते।
तस्मात् कर्मक्षयादेव हेत्वभावेन मुच्यते।।[14] **इति।**

पार्थसारथिमिश्राभिमतं मोक्षस्वरूपम्

पार्थसारथिमिश्रा अपि शरीरेन्द्रियविषयात्मकात्प्रपञ्चादात्मनो राहित्यमेव मोक्षरूपत्वं शास्त्रदीपिकायां प्रतिपादयाञ्चक्रुः "तदस्य त्रिविधस्यापि बन्धस्यान्तिको विलयो मोक्ष"[15] इति।

यतो हि पार्थसारथिमिश्रा मोक्षे दुःखानुरूपं सुखस्याप्युच्छेदं स्वीकुर्वन्ति एतदर्थमेतेषामपि प्रतिपादने मोक्षस्य नास्ति सुखरूपत्वमपितु दुःखाभावत्वमेवैतेषामभिमतं वर्तते मोक्षस्वरूपम्।

गागाभट्टाभिमता मुक्तिः

सप्तदशशतख्रैस्ताब्दिकालिकैर्विश्वेश्वरभट्टापरनामधेयैर्गागाभट्टैरपि 'प्रपञ्चस्य सर्वथा विलयो मुक्तिः'[16] इत्यनया पङ्क्त्या दुःखाभावत्वमेव प्रतिपादितं मुक्तेः स्वरूपं भाट्टचिन्तामणौ।

मोक्षस्यानन्दात्मकत्ववादः

यद्यपि कुमारिलभट्टपार्थसारथिमिश्रप्रभृतिभिर्दुःखाभावत्वेनाङ्गीकृतो मोक्षस्तथाप्यस्यानन्दात्मकत्वेन स्वीकृतेरपि भाट्टप्रघट्ट एव प्रकाशतेऽपरोऽपि पक्षः। अत्र मोक्षस्यानन्दरूपतावादस्य पक्षधरेषु चिन्तकेषु चिदानन्दनारायणकमलाकरभट्ट शङ्करशुक्लप्रभृतयो विराजन्ते भाट्टमतावलम्बिनो मीमांसकाः।

चिदानन्दस्याभिमतम्

भाट्टमतावलम्बिना चिदानन्देन 'नीतितत्त्वाविर्भावे' वयन्तु सकलदुःखविलये सति नित्यनिरतिशयानन्दाभिव्यक्तिलक्षणं मोक्षमाचक्ष्महे।'[17] इत्यनेन प्रतिपादनेन मोक्षस्य दुःखाभावसहकृतमानन्दात्मकत्वं प्रकाशितम्।

नारायणभट्टाभिमतं मोक्षस्वरूपम्

मानमेयोदयग्रन्थस्य कर्तारो नारायणपण्डिता अपि मोक्षस्यानन्दात्मकत्वमेवाचक्षन्ते। दुःखानामत्यन्तसमुच्छेदे सति आत्मनि (स्वरूपतो) विद्यमानस्य सुखस्य या मनसा भुक्तिः सा एवैतेषां दृष्ट्या वर्तते कुमारिलभट्टप्रतिपादिता मुक्तिः। अयमेवार्थः कारिकया एभिः प्रकाश्यते-

दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः।
सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलैः।।[18] **इति।**

अत्रात्मनि विद्यमानोऽयमानन्दः संसारावस्थायामपि कथमनुभवपथं नायाति चेत्वर्तते पूर्वपक्षस्य प्रश्नस्तर्ह्यस्य प्रश्नस्य समाधानार्थमेभिरुच्यते यत्संसारावस्थायामस्यानन्दस्यानुभूतयेऽपेक्षितायाः कारणसामग्र्याअभावादेव नानुभूयते विद्यमानोऽप्ययमानन्दः। आत्मनः स्वरूपभूतस्य मोक्षानन्दस्यानुभूतौ शरीरेन्द्रियादीनामात्यन्तिकविनाशानुगृहीतस्य मनस एव कारणत्वमेतेषामभिमतम्। संसारावस्थायां मनस्तु वर्तते परन्तु शरीरेन्द्रियादीनामात्यन्तिकविनाशसहकृतं तस्यास्तित्वं नास्त्येव। शरीरेन्द्रियादीनामात्यन्तिकविनाशात्मकेन विशेषणेनास्य मनसो विशिष्टत्वं मोक्षावस्थायामेव सम्भवति। संसारावस्थायां मोक्षानन्दानुभूतेः कारणात् सर्वथा विपरीतस्य शरीरेन्द्रियादीनां सद्भावसहकृतस्य मनस एवावस्थानादस्य मोक्षानन्दस्य विद्यमानत्वेऽपि न जायते प्रतीतिः।

यद्यप्यत्र **"अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः"**[19]

इत्यनया श्रुत्या मोक्षावस्थायां शरीरेन्द्रियाणामभावात्सुखदुःखानामप्यभावान्मोक्षस्य अभावात्मकत्वमेव श्रुतिसिद्धमित्याक्षिपेरन् पूर्वपक्षिणस्तर्ह्येतेषामयमाक्षेपो नारायणभट्टानां दृष्ट्या नास्ति क्षोदक्षमः। मोक्षावस्थायाम् इन्द्रियजन्यसुखदुःखादीनाम् अभावप्रतिपादनमेव अस्याः श्रुतेः तात्पर्यमित्याशयो वर्तते नारायणभट्टवर्याणाम्। अनेनैव तात्पर्येण एभिरुच्यते यन्मुक्तेः सुखाभावत्वस्याङ्गीकारेऽस्य पुरुषार्थत्वमेव न स्यात् न हि कश्चिदभावसिद्धये प्रवर्तेत। एतदर्थं परमपुरुषार्थत्वेनाभिमतस्य मोक्षस्य पुरुषार्थत्वसिद्ध्यै मोक्षस्यानन्दात्मकत्वमेतेषां दृष्ट्यावश्यमेवाङ्गीकरणीयम्[20] इत्यलमतिपल्लवितेन।

कमलाकरभट्टाभिमतं मोक्षस्वरूपम्

मीमांसाकुतूहलकारैर्भट्टकुलावतंसैः कमलाकरभट्टपादैरपि मोक्षस्य

दुःखाभावत्वमात्रं निरस्य "तस्मात्सिद्धं नित्यसुखाभिव्यक्तिर्मुक्तिरित्यनया पङ्क्त्या नारायणभट्टानुरूपम् आत्मनः स्वाभाविकस्यानन्दस्याभिव्यक्तिरूपेणैव अस्यानन्दात्मकत्वं निरूपितम्। आत्मनो मुक्तौ आनन्दरूपता कथं भवेदित्यस्मिन्प्रश्ने समाधानार्थं कमलाकरभट्टैः मनसा स्वरूपभूतस्यानन्दस्यानुभूतिरूपं नारायणाभिमतं मतं परित्यज्य 'तत्त्वतस्तु अस्माकं मोक्षो वेदान्ताभिमतादभिन्न एव' इत्यनया पङ्क्त्या कैवल्यलक्षणात्मकमात्मनः स्वरूपभूतावस्थानं वेदान्ताभिमतं मोक्षस्वरूपमेव एतेषामभिमतमिति स्पष्टं प्रतिपादितम्।[21]

शङ्करशुक्लाभिमतं मोक्षस्वरूपम्

उज्जयिन्यां सिन्धियाप्राच्यविद्याशोधप्रतिष्ठाने पाण्डुलिपित्वेन वर्तमानस्याप्रकाशितस्य 'मीमांसार्थप्रदीप'-सञ्ज्ञकस्य ग्रन्थस्य लेखकैः काण्वशङ्करशुक्लमहाभागैरपि कमलाकरभट्टानुरूपं 'नित्यनिरतिशयसुखाभिव्यक्तित्वं मोक्षत्वम्' इत्यनया पङ्क्त्या मोक्षस्यानन्दात्मकत्वं संसाध्य 'एवं ब्रह्मसुखावाप्तौ नित्यत्वान्निरतिशयत्वाच्च लक्षणसमन्वय'[22] इत्यनया पङ्क्त्या मोक्षलक्षणस्य समन्वयं स्वीकुर्वद्भिरात्मनो वेदान्तपक्षपातित्वमपि सुतरां प्रकाशितम्।

'मोक्षे' उभयमतयोः समन्वयः

भाट्टप्रस्थानान्तर्गतानां मीमांसकानां मोक्षस्वरूपस्य प्रतिपादनेषु मोक्षस्य अभावात्मकत्वानन्दात्मकत्वयोः स्वरूपयोरापाततः प्रतीयमानेऽपि विरोधे विचार्यमाणेऽत्र विरोधाभास एव वर्तते न तु वास्तविको विरोधः। भट्टपादास्तावत्स्वर्गस्य भावात्मकत्वात्कर्मजन्यतयानित्यत्वाच्चास्य 'सुखोपभोगरूपश्च' इत्यनेन पूर्वोक्तेन वार्तिकेन मोक्षात्मकत्वं यद्यपि निराकुर्वन्ति तथापि अग्निहोत्रादीनामवश्यं फलवत्त्वनियमादेतेषामनुष्ठानस्य परित्यागाज्जैमिनेः शासनोल्लङ्घनदोषस्य च समुत्पन्नत्वादत्रोच्यते भट्टपादैर्यत्तदेव कर्म फलोत्पादकत्वाद्बन्धजनकं भवेत् यद् फलकामनाबुद्ध्या एवानुष्ठीयेत। फलकामनाविरहितेन चेतसा यदा कर्तव्यबुद्ध्या एवानुष्ठीयते तदा तदेव कर्म न बन्धजनकमपितु फलाजन्यत्वान्मोक्षसाधनमेव इत्यङ्गीक्रियते-

'प्रार्थ्यमानं फलं ज्ञातं न चानिच्छोर्भविष्यति'[23] इति।

वार्तिकमिदं विवृण्वद्भिः पार्थसारथिमिश्रैरपि न्यायरत्नाकरव्याख्यां भगवद्वाक्यमाश्रित्य प्रस्तूयते समाधानम्। भगवद्गीतायां भगवता कर्मफलविषयिणीं कामनां विहाय दिव्यभावनया कर्मानुष्ठानरतानामेव सन्न्यासीत्वं योगीत्वञ्च निरूपितम्-

'अनाश्रितं कर्मफलं कार्यं कर्म करोति यः।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः।।'[24]

अस्य भगवद्वाक्यस्यानुरोधादत्र पार्थसारथिभिरपि-

'सत्यम्, तानि तु फलाभिसन्धिकृतानि स्वफलदानेन पुरुषं बध्नन्ति, न त्वनभिसन्धिकृतानिति।'[25] इत्यनया पङ्क्त्या फलकामनाबुद्ध्यानुष्ठितानामेव कर्मणां बन्धजनकत्वमङ्गीकृत्य फलासक्त्याविरहितेन चेतसानुष्ठितानां फलाजनकत्वमेव प्रतिपाद्यते।

भट्टपादानां स्वर्गस्य मोक्षत्वेनाङ्गीकारस्य निराकरणेन सह स्वर्गफलोत्पादकानां नित्याग्निहोत्रादीनामनासक्तिभावेन विहितस्य प्रतिपादनस्य समन्वयात्मिकया दृष्ट्या पर्यालोचनेन प्रतीयते यदेतेषां दृष्ट्या फलकामनाबुद्ध्यानुष्ठितकर्मजन्यस्य स्वर्गस्यैव मोक्षत्वमेभिर्निराकृतम्। निरतिशयप्रीत्यात्मकेन यस्यानन्दस्य मोक्षत्वम् आनन्दरूपतावादिभिः प्रतिपादितं, तस्यापि विषयजन्यानन्देन वैलक्षण्यात् वैषयिकसुखाभावात्मकत्वेनात्मनः स्वरूपत्वमेव वर्तते। अस्यात्मनः स्वरूपभूतस्य सुखविशेषत्वेनाभिमतस्य स्वर्गस्य जन्यसुखदुःखानामभावात्मकेन मोक्षस्वरूपेण सह नास्ति कोऽपि विरोधः।

अस्य विवेचनस्य निष्कर्षस्तु अयमेव वर्तते यन्मोक्षस्यानन्दरूपतावादोऽपि जन्यसुखाभावस्यैव वर्तते एका भावात्मिका प्रतीतिः। वस्तुतस्तु जन्यसुखदुःखानामभावस्य मोक्षत्वमुभयवादि-सम्मतम्।

ज्ञानकर्मणोः समुच्चयस्य मोक्षकारणत्वम्

अनेकेषु विषयेषु सत्स्वपि विरोधेषु मोक्षसाधनत्वनिर्णये प्रभाकर-कुमारिलयोरुभयोरपि मतैक्यं परिलक्ष्यते। प्रभाकरमतावलम्बिनां शालिकनाथानां वर्तते प्रतिपादनमिदम् शमदमब्रह्मचर्यादिभिः साधनैः सहकृतेन आत्मज्ञानेन 'न स पुनरावर्तते'[26] इत्यनेनापुनरावृत्तिप्रतिपादकस्य श्रुतिवाक्यस्यानुरूपं निखिलं कर्माशयं नाशयन् मुमुक्षुर्मुक्तो भवति। अत्र ज्ञानस्य प्राधान्यं वर्तते कर्मणो वा? इत्यत्र एकस्मिन्नपि पक्षे प्राधान्यनिर्णयार्थं विनिगमनाभावात्परस्परमुभयोरङ्गाङ्गीभावस्य असिद्धत्वादगत्या ज्ञानकर्मणोः समुच्चय एवाङ्गीकरणीयो वर्तते।[27]

भट्टपादानामपि सिद्धान्ते ज्ञानकर्मणोः समुच्चय एव मोक्षसाधनत्वेनाङ्गीकृतो वर्तते। एतेषां वर्तते इदं प्रतिपादनम्-

आत्मज्ञाने समुत्पन्ने, प्रारब्धकर्मणां भोगेन नाशे सञ्जाते, नित्यनैमित्तिकानां कर्मणामनुष्ठानान्निषिद्धानाञ्चाननुष्ठानादुत्तरकर्मराशेरभावात्तस्यैव च शरीरोत्पत्तौ कारणत्वात् कर्माशयाभावात् शरीराभावात्मको मोक्षः सिद्धो भवति।

तत्र ज्ञातात्मतत्त्वानां भोगात् पूर्वक्रियाक्षये।
उत्तरप्रचयासत्त्वाद् देहो नोत्पद्यते पुनः।।[28]

मोक्षेऽस्मिन् ज्ञानमात्रस्य हेतुत्वं भट्टाभिमतं नास्ति। आत्मज्ञानेन सह काम्यनिषिद्धकर्मवर्जनपुरस्सरमकरणे प्रत्यवायोत्पादकानां नित्यनैमित्तिक-कर्मणामनुष्ठानस्यापि मोक्षहेतुत्वं कुमारिलभट्टपादैः सम्बन्धाक्षेपपरिहारवार्तिके स्पष्टरूपेणोपन्यस्तम्-

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया।।[29]

भट्टपादैर्विरचितस्य 'तन्त्रवार्तिकस्य' राणकापराभिधया प्रसिद्धायां 'न्यायसुधायां' व्याख्याकारैर्भट्टसोमेश्वरैरपि "ननु निश्श्रेयसं ज्ञानाद् बन्धहेतोर्न कर्मणः' इत्यत्र प्रथमपङ्क्तौ 'ननु' शब्देनाशङ्कामुत्थाप्य-

'नैकस्मादपि तत्किन्तु ज्ञानकर्मसमुच्चयाद्'

इति द्वितीय-पङ्क्तौ प्रस्तूयते इदमेव समाधानं यज्ज्ञानकर्मणोः कस्याप्येकस्यावलम्बनेन यतो हि न साध्यते मोक्षोऽयं, तस्मात् कारणादत्रोभयोः समुच्चयस्यैव कारणत्वमङ्गीकरणीयमिति।[30]

अत्र ज्ञानकर्मसमुच्चये केनरूपेण समुच्चयो भवतीति समुत्थापितः प्रश्नः कमलाकरभट्टैः मीमांसाकुतूहले समप्राधानेन अङ्गाङ्गिभावेन वा?

अत्रेतेषामिदं समाधानं यद् 'ब्रह्मविदाप्नोति परम्' तरति शोक्मात्मवित्' इत्यादिभिः तनवज्ञानस्य मोक्षाहेतुत्वम्। तथा 'तमेतं वेदानुवचनेन विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' सत्येन लभ्यस्तपसा ह्येष आत्मा इत्यादिभिः श्रुतिवचनैः हारित स्मृतौ-

उभाभ्यामिवपक्षाभ्यां यथा रवे पक्षिणां गतिः।
तथैव ज्ञानकर्माभ्यां प्राप्यतेब्रह्मशाश्वतम्।।

इति श्रुतिस्मृतिप्रमाणसिद्धमिदं ज्ञानकमसमुच्चयस्य-मोक्षहेतुत्वमिति।

एवमेव 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते' इत्यत्र कर्मनिषेधात् 'ततो भूय इव ते य उ विद्यायां रताः इति केवलज्ञानस्यापि निषेधात् समुच्चय एव मोक्षहेतुत्वेन सिद्धोभवति।[31]

दर्शनप्रस्थानेषु कर्मणि प्रवर्तयितुमेव वर्तते मीमांसादर्शनस्य प्रवृत्तिः। सर्वसाधारणतया कर्मत्यागसहकृतेन ज्ञानेनैव मोक्षस्यावाप्तिः प्रतिपाद्यते दार्शनिकैः। अस्य मोक्षस्य स्थूलदृष्ट्या कर्मप्रवृत्तौ बाधकत्वमनुपश्यद्भिरेव सूत्रकारभाष्यकार-प्रभाकरैरत्र मौनमवलम्बितमिति प्रतीयते। कालान्तरे मोक्षविरहितस्यात्मनः पक्षस्य दर्शनत्वमेव कदाचिदङ्गीकृतं न स्यादित्यनया भीत्या मन्येऽग्रवार्तिभि-र्भाट्टप्रभाकरसम्प्रदायान्तःपातिभिराचार्यैर्विशदीकृतं मोक्षस्वरूपम्।

अस्य विवेचितस्य 'मोक्षस्वरूपस्य' सूत्रभाष्यग्रन्थयोरनुल्लेखादेवात्र मीमांसकैर्न्यायवेदान्तप्रस्थानयोरात्मनो रुचेरनुरूपमाकर्षितं मोक्षस्वरूपम्। येषां न्यायदर्शने आसीदभिरुचिस्तैरत्राभावात्मिका मुक्तिरङ्गीकृता। वेदान्तपक्षपातिभिस्तु न केवलं मुक्तेरानन्दात्मकत्वं स्थापितमपितु स्वपक्षस्य वेदान्ताभिन्नत्वमपि कण्ठतः स्वीकृतम्। मोक्षस्वरूपस्य निर्धारणे यद्यप्यङ्गीकृता मीमांसकैः न्यायदिशा वेदान्तदिशा वा, तथापि मोक्षसाधनत्वनिर्णये ज्ञानेन सह कर्मणामपि मोक्षसाधनत्वाङ्गीकारेणात्मनः कर्मप्रतिपादकत्वलक्षणं मीमांसकत्वमपि परिरक्षितमित्यलम्।

सन्दर्भ

1. तत्त्वसमाससूत्रम् सूत्रसङ्ख्या 22, पातञ्जलयोगप्रदीपे 107, पृष्ठे उद्धृतम्, पा०यो०प्र०गीताप्रेस-गोरखपुरम्, सं० 2051
2. साङ्ख्यदर्शनम् अ० 3, सू० सङ्ख्या 84 पृष्ठम् 510 चौ०सं० संस्थानम्, 1987
3. पातञ्जलयोगदर्शनम् पादसङ्ख्या 02 सू० सं० 26,
4. तत्त्वमसि छान्दोग्योप० 6/8/07
5. प्रकरणपञ्चिका पृ०-341, का०हि०वि०वि० वाराणसी, 1961
6. प्र० पञ्चिका पृ०-431
7. प्र० पञ्चिका पृ०-341, एवं Purva Mīmāmsa in its sources P. 31. B.H.U.Varanasi, 1964.
8. तन्त्ररहस्यम् पृ०-24, Baroda, Central library 1923.
9. आत्मा वाऽरे दृष्टव्यः बृहदा उ० 2/4/5 तथा 4/5/6
10. श्रोतव्यो मन्तव्यो निदिध्यासितव्यः वही

11. 'तरति शोकमात्मवित्' छान्दोग्योप० 3/2/9
12. 'तन्त्ररहस्यम्' पृ०-24
13. श्लोकवार्तिके सम्बन्धाक्षेपपरिहारवार्तिकम् वा०सं० 105
14. वही, वा०सं० 106
15. शास्त्रदीपिका पृ०-125 पङ्क्ति 30 कृष्णदासअकादमी, वाराणसी, 1988
16. भाट्टचिन्तामणि पृ०-43, पङ्क्ति 03 चौ०सं० सीरीज-ऑफिस-वाराणसी, 1933
17. नीतितत्त्वाविर्भाव:
18. 'मानमेयोदय:' पृ०-212 थियोसोफिकल-पब्लिशिंग-हाऊस-आड्यार-मद्रास-नगरी, 1933
19. 'अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत:'
20. ननु यदि संसारावस्थायामात्मसमवेत एवायमानन्दः तर्हि कथं नानुभूयते। अनुभवहेतोरभावादिति ब्रूमः। देहेन्द्रियादीनामात्यन्तिक परिध्वंसानुगृहीतं मनस्तदनुभवसाधनम्। किं तर्हि तादृशानन्दसद्भावे प्रमाणम्? आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यत इति श्रुतिरेव। न च श्रुतिरानन्दानुभूतिबाधकेति वाच्यम्। तस्या वैषयिकप्रियाप्रियस्पर्शनिवृत्तिमात्रपरत्वात्। अन्यथा मुक्तेरपुरुषार्थत्वप्रसङ्गात्। मानमेयोदय पृ०-212
21. 'तस्मात्सिद्धं नित्यसुखाभिव्यक्तिर्मुक्तिरिति। तत्त्वतस्तु अस्माकं मोक्षो वेदान्तिमतादभिन्न एव।' मीमांसाकुतूहलम् पृ०-52
सम्पूर्णानन्द संस्कृत विश्वविद्यालय: वाराणसी, 1987
22. 'किं नाम मोक्षत्वं नित्यनिरतिशयसुखाभिव्यक्तित्वं मोक्षत्वम्। एवं ब्रह्मसुखावाप्तौ नित्यत्वान्निरतिशयत्वाच्च लक्षणसमन्वयः। तदतिरिक्तसुखावाप्तौ नातिव्याप्तिः। तत्र नित्यत्वनिरतिशयत्वाभावात्।' मीमांसार्थ-प्रदीप:, पृ०-11, सि०प्रा०शो०प्र० उज्जयिनी
23. श्लोकवार्तिकस्य सम्बन्धाक्षेपपरिहारे वार्तिकम् वा०सं० 111
24. 'अनाश्रितं कर्मफलं' भगवद्गीता 6, 01
25. 'सत्यम् तानि तु फलाभिसन्धिकृतानि स्वफलदानेन पुरुषं बध्नन्ति, न त्वनभिसन्धिकृतानीति।'' सं०क्षेप०प० वार्तिकस्य न्यायरत्नाकरव्याख्या
26. 'न स पुनरावर्तते' छान्दोग्योप० अ० 8
27. 'शमदमब्रह्मचर्यादिकाङ्गोपबृंहितेनाऽऽत्मज्ञानेन न स पुनरावर्ततइत्यपुनरावृत्तये चोदितेन निश्शेषकर्माशयं नाशयन् मुच्यते प्रकरण-पञ्चिका, पृ०-341
28. श्लोकवार्तिकम् सम्बन्धाक्षेपपरिहारवार्तिकसङ्ख्या 108
29. श्लोकवार्तिकम् सम्बन्धाक्षेपपरिहारवार्तिकसङ्ख्या 110
30. प्रकरणपञ्चिकायामात्मवादपरिशिष्टम् पृ०-352 प्रकरण-पञ्चिका, का०हि०वि०वि० वाराणसी, 1961
31. मीमांसाकुतूहलम्। पृ० 361

मीमांसादर्शन की स्वरूपमीमांसा

8. भाट्टमीमांसा की वेदार्थ समन्विति
9. मीमांसा में प्रेय तथा श्रेय की अवधारणा
10. मीमांसा का नैतिक तथा सामाजिक अवदान
11. मीमांसादर्शन का लोकोपयोगी स्वरूप
12. मीमांसा का एकवाक्यता सिद्धान्त
13. मीमांसा में समन्वय एवं एकत्वनिष्पादन की प्रवृत्ति
14. मीमांसा में अपूर्वविधि की अवधारणा
15. पूर्व मीमांसा में अपूर्वता के त्रिविध आयाम
16. न्याय, व्याकरण तथा मीमांसा का अर्थसिद्धान्त
17. भाट्ट–मीमांसाभिमत वाक्यार्थ एवं शाब्दबोधप्रक्रिया

8

भाट्टमीमांसा की वेदार्थ-समन्विति

भारतीय चिन्तन की आस्तिक शाखाओं ने अपने समग्र चिन्तन का प्रामाण्य वेद में खोज कर नितान्त गौरव का अनुभव किया है। इन आस्तिक विचार-धाराओं में भी मीमांसा तथा वेदान्त का समग्र चिन्तन साक्षात् रूप से वेद की अर्थनिष्पत्ति पर ही अवलम्बित है। मन्त्र-ब्राह्मणात्मक वेद[1] के समग्र अर्थ का ज्ञान मात्र में समावेश जहाँ वेदान्त का लक्ष्य है, वहीं जैमिनि का स्पष्ट कथन है कि "समग्र वेद, क्रिया (कर्मकाण्ड) का उपेदश देता है अतएव वेद में ऐसे अंश, जिनका कर्म के साथ सम्बन्ध नहीं है, वे अर्थहीन हैं, अतः अनित्य कहे जाते हैं[2] फलतः वेद के समग्र वाक्यों का किसी न किसी कर्म मे समन्वय तथा उनकी अर्थ-निष्पत्ति में प्रतीत होने वाली असङ्गति का परिहार ही सम्पूर्ण मीमांसा का प्रयोजन है। समग्र वेदार्थ को कर्म के रूप में स्थापित करने के उद्देश्य से ही वेद को विधि, अर्थवाद, मन्त्र और नामधेय, इन चार प्रमुख भागों में विभक्त कर उनका विस्तृत विवेचन किया गया है।

महर्षि जैमिनि ने धर्म के रूप में प्रतिपादित कर्मात्मक वेदार्थ की पूर्ण निष्पत्ति के उद्देश्य से अपने सूत्रग्रन्थ को बारह अध्यायों में विभक्त कर उनमें से प्रथम में धर्म, द्वितीय में धर्म-भेद, तृतीय में अङ्गाङ्गि-भाव, चतुर्थ में यागकर्ता के गुण, पञ्चम में क्रम, षष्ठ में अधिकार, सप्तम तथा अष्टम में क्रमशः सामान्य तथा विशेष अतिदेश, नवम में ऊह, दशम में बाध, एकादश में तन्त्र तथा द्वादश अध्याय में प्रसङ्ग का निरूपण कर 'कर्म' के रूप में समग्र वेदार्थ को प्रतिपादित किया है।

वेदाऽपौरुषेयत्व तथा वेदार्थसमन्वय

महर्षि जैमिनि ने वेद को पुरुषनिष्ठ दोषों से रहित सर्वथा निर्दोष प्रतिपादित

करने के लिए युक्तिपूर्वक वेद के अपौरुषेयत्व का प्रतिपादन किया है। महर्षि ने प्रथम पूर्वपक्ष की दृष्टि से "वेदांश्चैके सन्निकर्षं पुरुषाख्या[3]" तथा "अनित्यदर्शनाच्च"[4] इन दो सूत्रों के माध्यम से वेद के अपौरुषेयत्व तथा नित्यत्व पर प्रश्नचिह्न उपस्थित किया है। प्रथम सूत्र का आशय यह है कि "चूँकि वेद के कर्ता के रूप में काठक आदि पुरुषों के नामों का उल्लेख है अतः वेद पौरुषेय होने से आधुनिक (सन्निकर्ष) है।

द्वितीय सूत्र यह कहता है कि वेद में जन्म-मरण वाले बबर, कुसुरविन्द, औद्दालकि आदि अनित्य व्यक्तियों का उल्लेख है अतः वेद का इनके पूर्व में अभाव होने के कारण इन्हें नित्य नहीं माना जा सकता है।

महर्षि जैमिनि ने पूर्वपक्ष की दृष्टि से उत्थापित शङ्काओं का "आख्या प्रवचनात्"[5] तथा परन्तु श्रुतिसामान्यमात्रम्"[6] इन दो सूत्रों द्वारा समाधान कर वेद की सार्वभौम सत्ता स्थापित की है।

समाधानार्थ प्रस्तुत प्रथम सूत्र में यह कहा गया है कि "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः"[7] इस सूत्र से चूँकि शब्दरूप वेद, वेदार्थ (कर्म) तथा इनका (प्रत्यायकत्व) सम्बन्ध, इन तीनों की नित्यता प्रतिपादित की गई है अतः वेद में श्रुत कठ आदि पुरुष वेद के निर्माता नहीं हैं, अपितु प्रवचनकर्ता हैं।

वेद के अनित्यत्व की शङ्का के निवारक द्वितीय सूत्र का यह प्रतिपादन है कि वेद में जो "बबर" आदि का उल्लेख है, वहाँ इन नामों वाले किसी व्यक्ति की विवक्षा नहीं है अपितु यह केवल शब्द-सामान्य है।

श्रीमाधवाचार्य ने भी यही प्रतिपादित किया है कि कठ आदि वेद के प्रवचनकर्ता के रूप में उल्लिखित हैं, कर्ता के रूप में नहीं। इसके अतिरिक्त वेद के किसी कर्ता की भी उपलिब्ध नहीं होती अतः वेद (पौरुषेय) वाक्य नहीं है अपितु अपौरुषेय है।[8]

